पुराणेषु सांख्ययोगवेदान्तविमर्शः

# ।। प्रकरणम्-३ ।।

## ।। सांख्ययोगवेदान्तपदस्य निर्वचनम् ।।


| क्रमः | प्रकरणनाम | पृष्ठसंख्या |
|---|---|---|
| ३.१ | प्रस्तावना । | 163-257 |
| ३.२ | सांख्यपदस्य निर्वचनम् । | |
| ३.३ | सांख्यपदस्य विविधा अर्थाः । | |
| ३.४ | सांख्यमेव योगः । | |
| ३.५ | वेदान्तपदस्य निर्वचनम् । | |
| ३.६ | विमर्शपदस्य निर्वचनम् । | |
| ३.७ | सांख्यदर्शनस्य कर्तृपरिचयः । | |
| ३.७.१ | कपिलः । | |
| ३.७.१.१ | कपिलस्य जन्मसमयः । | |
| ३.७.२ | आसुरिः । | |
| ३.७.३ | पञ्चशिखः । | |
| ३.७.४ | विन्ध्यवासी । | |
| ३.७.५ | जैगीषव्यः । | |
| ३.७.६ | वार्षगण्यः । | |
| ३.७.८ | सनकादयः । | |
| ३.८ | सांख्यदर्शनस्य भाष्यकाराः । | |
| ३.८.१ | श्रीमदीश्वरकृष्णः । | |
| ३.८.१.१ | श्रीमदीश्वरकृष्णस्य जन्मस्थानम् । | |
| ३.८.१.२ | श्रीमदीश्वरकृष्णेन प्रणीता सांख्यकारिका जन्मस्थानम् । | |
| ३.८.१.३ | श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया रचनाकालः । | |
| ३.८.१.४ | श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकायाष्टीकाः । | |
| ३.८.१.४.१ | माठरवृत्तिः । | |

३.८.१.४.३ गौडपादभाष्यम् ।
३.८.१.४.४ जयमङ्गला ।
३.८.१.४.५ सांख्यतत्त्वकौमुदी ।
३.८.२ श्रीवाचस्पतिमिश्रः ।
३.८.३ उदयवीरशास्त्री ।
३.९ सांख्यदर्शनस्य वर्ण्यविषयः ।
३.९.१ सांख्यसिद्धान्ताः ।
३.९.२ त्रिविधं प्रमाणम् ।
३.९.३ कालः ।
३.९.४ पुरुषः ।
३.९.५ मोक्षः ।
३.९.६ जीवनमुक्तिः ।
३.९.७ ईश्वरः ।
३.९.८ सत्कार्यवादः ।
३.९.९ वास्तववादः ।
३.९.१० सांख्यदर्शनस्य प्रवृत्तिः ।
३.९.११ पुरुषबहुत्वम् ।
३.९.१२ कथमुपरागः ?
३.९.१३ सृष्टिक्रमः ।
३.९.१४ सदसत्ख्यातिः ।
३.१० सांख्यदर्शनस्य लोकोपयोगिता ।
३.१०.१ सांख्यदर्शनस्याधिकारिस्वरूपम् ।
३.१०.२ सांख्यदर्शनस्य परब्रह्मपरमात्मस्वरूपम् ।
३.१०.३ सांख्यदर्शनस्य पञ्चविंशतितत्त्वात्मनः स्वरूपम् ।
३.१०.४ सांख्यदर्शनस्य प्रकृतिस्वरूपम् ।

३.१०.५ सांख्यदर्शनस्य बुद्धिस्वरूपम् ।
३.१०.६ सांख्यदर्शनस्याहङ्कारस्वरूपम् ।
३.१०.७ सांख्यदर्शनस्य मनसः स्वरूपम् ।
३.१०.८ सांख्यदर्शनस्य सूक्ष्मशरीरस्वरूपम् ।
३.१०.९ सांख्यदर्शनस्य तत्त्वमीमांसा ।
३.१०.१० सांख्यदर्शनस्य पञ्चमहाभूतस्वरूपम् ।
३.१०.११ सांख्यदर्शनस्य गुणत्रयस्वरूपम् ।
३.१०.१२ सांख्यदर्शनस्य पुरुषबहुत्वस्वरूपम् ।
३.१०.१३ सांख्यदर्शनस्य प्रमाणसंख्यास्वरूपम् ।
३.१०.१४ सांख्यदर्शनस्य कर्मफलपुनर्जन्मसिद्धान्तः ।
३.१०.१५ सांख्यदर्शनस्य दैवकालस्वभावादितत्त्वम् ।
३.१०.१६ सांख्यदर्शनस्य महाप्रलयवर्णनम् ।
३.१०.१७ सांख्यदर्शनस्य जीवन्मुक्तस्वरूपम् ।
३.१०.१८ सांख्यदर्शनस्य मोक्षस्वरूपम् ।

## प्रकरणम् ३ सांख्ययोगवेदान्तपदस्य निर्वचनम् ।

### ३.१ प्रस्तावना ।

**कपिलं परमर्षिं च यं प्राहुर्यतयः सदा ।**
**अग्निः सः कपिलो नाम सांख्योयोगप्रवर्तकः[१] ।।**
**दशानामेव कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।**
**गर्भं माता सुधितं वक्षणास्ववेवन्तं तुषयन्ती बिभर्ति[२] ।।**

भारतीयदर्शनस्य क्षेत्रे सांख्यदर्शनस्यास्तिकदर्शनरूपे विशिष्टमेकं स्थानमस्ति, सांख्यदर्शनस्य वैदिकपरम्परामूलकानां सिद्धान्तानां प्राचीनता वर्तते, अतो भवदुःखनिवृत्तये सर्व्वेषामुपायानां रूपेण सांख्यदर्शनस्य शाश्वती उपादेयता तथा ग्राह्यताक्षुण्णा वर्तते, अनया रीत्या संसारात्कैवल्यं यावद्विवेचनापूर्णे सांख्यदर्शने नैके व्याख्येयाः सिद्धान्ताः सन्ति, अनेन प्रकारेण विश्वस्य सर्वाधिकं प्राचीनदर्शनशास्त्रं सांख्यमपि वैदिककालादेव सर्वाधिकलोकप्रियत्वाद् विद्वत्सु चिन्तनस्य विषयः संजातः, अनया शृङ्खलया सर्वेषु पुराणेषु महापुराणेषु च सांख्यदर्शनस्य गम्भीरं चिन्तनम् ऋषिभिर्महर्षिभिश्च प्रस्तुतमस्ति, अतोस्य सांख्यदर्शनस्य सम्यज्ज्ञानाय तथा च मम 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति नामकस्य शोधविषयस्य विशेषरूपेण प्रवेशायैतेषां विषयाणां ज्ञानमतीवावश्यकमस्ति, यथा - सांख्यपदस्य निर्वचनम् , सांख्यपदस्य विविधा अर्थाः, सांख्यमेव योगः, वेदान्तपदस्य निर्वचनम् , सांख्यदर्शनस्य कर्तृपरिचयः, सांख्यदर्शनस्य भाष्यकाराः, सांख्यदर्शनस्य वर्ण्यविषयः, सांख्यदर्शनस्य लोकोपयोगिता, इत्थमष्टानां विषयाणां विवेचनं मया विशेषण प्रस्तूयते तद्यथा -

---

[1] महाभारतम्-वनपर्व २२१।२१

[2] ऋग्वेदः १०।२७।१६

३.२ सांख्यपदस्य निर्वचनम् ।

सांख्यपदस्य पाणिनीयव्याकरणदृष्ट्या निर्वचनम्भवति यद् – संख्यानमिति सांख्यमिति विग्रहे समुपसर्गात् 'चक्षिङ्-व्यक्तायां वाचि[१]' इति धातोः 'आतश्चोपसर्गे[२]' इति पाणिनीयसूत्रेण अङ्प्रत्यये, ङित्त्वात् 'आतो लोप इटि च[३]' इति पाणिनीयसूत्रेण धातोराकारस्य लोपे, स्वादिकार्य्ये स्त्रीत्वविवक्षायां 'संख्या' इति शब्दो निष्पद्यते, यस्य संख्याशब्दस्यार्थो भवति यद् – गणना, संख्याया इदम् इत्यर्थे 'तस्येदम्[४]' इति पाणिनीयसूत्रेण अण्प्रत्यये, णित्त्वाद् , आदिवृद्धौ, 'यस्येति च[५]' इति पाणिनीयसूत्रेण आकारस्य लोपे, स्वादिकार्य्ये सति, अथवा संख्यायाम्भवमिति सांख्यम् 'सांख्यम्' इति शब्दो निष्पद्यते, यस्य सांख्यशब्दस्यार्थो भवति यद् – गणनासम्बन्धि ज्ञानम् , गणनायोग्यमिति सांख्यम् , कथं यत् – सांख्यदर्शने तत्त्वानां गणना अर्थात् संख्याया विशेषेण महत्त्वं प्रदत्तमस्ति, अतोस्य दर्शनस्य नाम सांख्यदर्शनं वर्तते । इदं सांख्यदर्शनं सर्वेषां तत्त्वानां विश्लेषात्मिकां परिगणनां प्रस्तौति, किन्तु महाभारतकारो महाभारते सांख्यपदस्य विशिष्टमर्थमनेन प्रकारेण करोति तद्यथा –

**दोषाणां च गुणानां च प्रमाणं प्रविभागतः ।**
**कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्[६] ।।**

अनेन प्रकारेण महाभारतकारस्यानुसारं दोषाणां गुणानामेकेन प्रकारेण कथनमेव सांख्यदर्शनं भवति ।

---

1 अदादिधातुः १०८७

2 पा. सू. ३।३।१०६

3 पा. सू. ६।४।६४

4 पा. सू. ३।३।१०६

5 पा. सू. ६।४।६४

6 महाभारतम्-१२।११९।३४

३.३ सांख्यपदस्य विविधा अर्थाः ।

सामान्यतया सांख्यशब्दस्य व्युत्पत्तिलभ्योर्थो भवति यद् – ज्ञानम् , गणना । महाभारतकारोपि विविधान् अर्थान् लिखति यद् –

**संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।**

**तत्त्वानि च चतुर्विंशत्तेन सांख्याः परिकीर्तिताः[१] ।।**

परिसंख्यादर्शनम्[२] ।

मीमांसादर्शने पारिभाषिकोर्थः प्रदत्तो वर्तते यद् – निषेध्यविषयस्य साधनरूपे विधानम् । सांख्यदर्शनस्य लक्ष्यं पुरुषतत्त्वस्य ज्ञानमस्ति, तथा प्रकृत्यादीनि चतुविंशतितत्त्वानि निषेध्यानि सन्ति, किन्तु एतैनिषेध्यतत्त्वैः पुरुषस्य विवेकज्ञानम्भवति । सांख्यसूत्रस्य प्रसिद्धो भाष्यकारो विज्ञानभिक्षुर्महाभारतस्य परिसंख्यानं तथा पानपरकमित्यर्थं स्वीकुर्वाणो लिखति यत् –

सम्यग्विवेकेनात्मकथनम्[३] ।

अमरकोशकारोमरसिंहः सांख्यपदस्य विविधानर्थाननेन प्रकोरण करोति तद्यथा –

चर्चा संख्या विचारणा[४] ।

तर्कवागीशः पण्डितरघुनाथः सांख्यपदस्य अर्थमनेन प्रकोरण करोति तद्यथा –

कस्मात् सांख्य इत्युच्यते ? सम्यक् क्रमपूर्वकं ख्यानं कथनं यस्यां सा संख्या नाम क्रमपूर्वा विचारणा । यत्तामधिकृत्य कृतं तस्मात्सांख्यमिति[१] ।

---

1 महाभारतम् १२।३०।६।४३

2 महाभारतम् १२।३०।६।४२

3 सांख्यप्रवचनभाष्य-प्रस्तावना-पृष्ठसंख्या-४

4 अमरकोशः १।५।२

इत्थन्नैकेषां विदुषां सांख्यसूत्रभाष्यकाराणां मते सांख्यपदस्य विविधा अर्थाः सन्ति ।

३.४ सांख्यमेव योगः ।

सांख्यशास्त्रं मूलतस्तत्त्वेषु स्वमतं प्रस्थापयति, तत्र प्रथमा प्रकृतिः, तदनन्तरं पुरुषः । प्रकृतिर्जडात्मिका त्रिगुणात्मिका च वर्तते, सत्त्वरजस्तमस्स्वरूपाः त्रयो गुणा द्रव्यात्मकाः सन्ति, एते त्रयो गुणाः प्रकृतेः प्रारम्भका वोत्पादका न सन्ति, किन्तु स्वभावरूपाः सन्ति । सत्त्वरजस्तमस्स्वरूपाः त्रयो गुणा यथाक्रमं सुखात्मकाः, दुःखात्मका मोहात्मकाश्च सन्ति, तथा च सत्त्वस्य धर्मः प्रकाशः, रजः क्रियाशीलं तमोढ वरोधकं गुरुतायुक्तं वर्तते । प्रकृतिः प्रतिक्षणं परिणामिन्येका नित्या चास्ति, अत एव सृष्टिरियं प्रकृतेः परिणामस्वरूपा वर्तते । प्रकृतित एव बुद्धि-अहंकार-पञ्चतन्मात्रा-एकादशेन्द्रिय-पञ्चभूतानां सृष्टिर्भवति, अत एतानि तत्त्वानि प्रकृतित आविर्भवन्ति, अर्थाद् उत्पत्तिपूर्वमपि तेषामव्यक्तमस्तित्वं कारणे भवति, अनेन प्रकारेण सांख्याः सत्कार्यवादिनः सन्ति ।

पुरुषश्चेतनोपरिणामी च वर्तते, अतः परिणामिनी बुद्धिर्वा ज्ञानं तत्स्वरूपं नास्ति । सः पुरुषः त्रिगुणातीतः सुखदुःखमोहरहितो वर्तते, सः पुरुष एको नास्ति, अपि त्वनेको वर्तते । अविद्याकारणेन प्रकृतिपुरुषयोः संयोगोस्ति, अनेन प्रकारेण विद्याजन्यसंयोगपरिणामेन प्रकृतितो बुद्ध्यादीनां सृष्टिर्भवति, तदनन्तरं बुद्धेः पुरुषे तथा पुरुषस्य बुद्धौ प्रतिबिम्बं पतति, अनेन कारणेन पुरुषोपरिणामित्वादपि परिणामी दृश्यते, यदाविद्याया विनाशो भवति, तदा प्रकृतिपुरुषयोः संयोगो दूरीभवति, परिणामतः प्रकृतितो बुद्ध्यादीना सृष्टिरवरुद्धा भवति, इत्थं पुरुषः स्वस्मिन् स्वरूपे स्थिरो भवति, इयमेव मुक्तिरस्ति ।

[1] महाभारतीय सांख्य-पृष्ठसंख्या-११

अनेन प्रकारेण सांख्यशास्त्रमिदं जन्मादीनां संस्काराणां वाहकरूपं सूक्ष्मशरीरं स्वीकरोति, अनया रीत्या सांख्यदर्शनमिदं सांख्यदर्शनस्य प्रक्रियायाम् ईश्वरस्य स्थानं नास्ति ।

भगवत्पतञ्जलिना विरचितं योगदर्शनमविद्याया दूरीकरणाय विशेषेण आवश्यकमस्ति, तस्मिन् योगदर्शनेष्टौ योगास्सन्ति, तेषामष्टानां योगानां नामानि सन्ति तद्यथा –

१. यमः ।
२. नियमः ।
३. आसनम् ।
४. प्राणायामः ।
५. प्रत्याहारः ।
६. धारणा ।
७. ध्यानम् ।
८. समाधिः ।

लौकिकीनामलौकिकीनां पदार्थानामिच्छां विना रागद्वेषादीनां मुक्तिप्रयोजनायैतेषामष्टानामङ्गानामभ्यासेन विवेकज्ञानस्योदयो भवति, इदमेव विवेकज्ञानमविवेकज्ञानस्य नाशाय समर्थतममस्ति, अतो भगवन्तं पतञ्जलिमनेन प्रकारेण स्तुवन्ति तद्यथा –

**योगेन चित्तस्य पदेन वाचां मलं शरीरस्य वैद्यकेन ।**
**योपाकरोत्तं मुनीनां प्रवरं पतञ्जलिं प्राञ्जलिरानतोस्मि[1] ।।**

भगवत्पतञ्जलिना विरचितं योगदर्शनमेकमनन्यतमं चित्तशास्त्रमस्ति । योगदर्शनस्य दार्शनिकाः सर्वे सिद्धान्ताः सांख्यशास्त्रस्यैव सन्ति, इत्थं सांख्यशास्त्रमेकं योगशास्त्रं वर्तते ।

[1] सांख्ययोग–प्रस्तावना–पृष्ठसंख्या–१३

३.५ वेदान्तपदस्य निर्वचनम् ।

**वेदोखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च[१] ।।**

श्लोकस्यास्य भावो वर्तते, यत्समस्तर्ग्यजुःसामाथर्वलक्षणो विध्यर्थवादमन्त्रस्वरूपो वेदो धर्मे प्रमाणम् । अर्थवादानामपि विध्येकवाक्यत्वेन स्तावकतया धर्मे प्रामाण्यात् । वेदविदां स्मृतिधर्मे प्रमाणम् । वेदविदामिति विशेषणदानेन वेदमूलत्वेन स्मृत्यादीनां प्रामाण्यमिति तात्पर्यम् ।

**श्रेयः साधनता ह्येषां नित्यं वेदात्प्रतीयते ।**
**ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः[२] ।।**
**एकेन वेदविदा लिखितमस्मिन् श्लोके यत् –**
**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता[३] ।।**

सायणाचार्य्योपि लिखति यत् –

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेदः ।

अतिगभीरस्य वेदस्य शब्दानां 'अङ्ग्यन्ते ज्ञायन्ते वेदा अमीभिरिति अङ्गानि, अगि गतौ[४] अर्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि, अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषदि कथितं यत् – 'द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति[५]'' परा चैवापरा च, तत्रापरा ऋग्वेदः, यजुर्वेदः, सामवेदोथर्ववेदः, शिक्षा, कल्पो, व्याकरणं, निरुक्तं,

---

1 मनुस्मृतिः १।९.

2 वे. सा. इ. पृष्ठसं. ८

3 वे. सा. इ. पृष्ठसं. ९

4 भ्वादि..१५०

5 मुण्डकोपनिषद्

छन्दो, ज्यौतिषमिति । " अथ परा यया तदक्षरमधिगम्यते[१] " उपनिषद्वेदाक्षरविषयं हि विज्ञानमिह, परा विद्येति प्राधान्येन विवक्षितं नोपनिषच्छन्दराशिरिति तात्पर्यम् पराविद्यायाः । तदनन्तरं वैदिकसाहित्ये पुराणानामतीव गौरवास्पदं स्थानमस्ति । तदनन्तरं स्वयं सायणाचार्य्योपि वेदपदस्य निर्वचनमनेन प्रकारेण ददाति यत् -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**
**एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता[२] ।।**

वेदपदस्य निर्वचनं कुर्व्वाणः सायणाचार्य्योप्यनेन प्रकारेण लिखति यत् -

इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।

अनेन प्रकारेण वेदशब्दस्य नैका व्युत्पत्तयो भवन्ति, ता व्युत्पत्तयो वर्तन्ते तद्यथा -

विद - ज्ञाने[३], विद - सत्तायाम्[४] , विद - विचारणे[५], विद्लृ - लाभे[६], विद - चेतनाख्याननिवासेषु[७] , एतेषु पञ्चसु पृथक्पृथग्गणीयेषु विदधातुषु विविधा अर्था भवन्ति यथा -

विदन्ति जानन्ति, विद्यन्ते भवन्ति, विन्दते विचारयन्ति, विन्दन्ति लभन्ते सर्वे मनुष्याः सत्यविद्यां यैर्येषु वा तथा च विद्वांसश्च भवन्ति यैः ते चत्वारो वेदाः सन्ति ।

---

1 मुण्डकोपनिषद् १।१।४।

2 वै. सा. इ. पृष्ठसं. ९

3 अदादिधातुः ११४०

4 तुदादिधातुः १५२६

5 दिवादिधातुः १२७६

6 रुधादिधातुः १५३२

7 चुरादिधातुः १८४३

**अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः[१] ।।**

तुदादिगणीयाद् विद्लृ - लाभे[२] इति धातोः करणेथवा अधिकरणे 'करणाधिकरणयोश्च[३]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेन वेदशब्दो निष्पन्नो भवति, यस्यार्थो भवति यद् - विन्दति - विन्दते नाम लभते धर्मादिपुरुषार्थचतुष्टयोपायान् अनेन इति वेदः ।

रुधादिगणीयाद् विद - विचारणे[४] इति धातोः करणेथवा अधिकरणे 'करणाधिकरणयोश्च[५]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेन वेदशब्दो निष्पन्नो भवति, यस्यार्थो भवति यद् - विन्ते - विचारयति सृष्ट्यादिप्रक्रियाम् अनेन इति वेदः ।

चुरादिगणीयाद् विद - चेतनाख्याननिवासेषु[६] इति धातोः करणेथवा अधिकरणे 'करणाधिकरणयोश्च[७]' इति पाणिनीयसूत्रेण घञ्प्रत्ययेन वेदशब्दो निष्पन्नो भवति, यस्यार्थो भवति यद् - इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः ।

अनेन प्रकारेण विविधार्थकस्य विद-धातोर्निष्पन्नस्य वेदपदस्य व्युत्पत्तिः भवति । वेदतत्त्वार्थानां सारल्येनावगमयितुमेवैतेषां प्रवृत्तिः, अतो वेदानामनन्तरं स्मृतीनां पुराणानां च प्रमाण्यं वर्तते, इति उररीकृतं प्रमुखविद्वद्भिः - यथा - वेदार्थमेव स्पष्टीकर्तुं ज्ञानकर्मोपासनानां सिद्धान्ता अतिसरलतया भावगम्यया प्राञ्जलया भाषया विविधाभिर्भक्तशिरोमणीनां

---

1 वा. प. १।१ टीकायाम्

2 तुदादिधातुः १५२६

3 पा. सूत्रम् ३।३।१७

4 रुधादिधातुः ११४०

5 पा. सूत्रम् ३।३।१७

6 चुरादिधातुः १८४३

7 पा. सूत्रम् ३।३।१७

मानवमणीनां कथाभिः सम्यगवबोधिताः सन्ति, येषां व्यावहारिकीं स्थितिं सम्पादयन्तो वेदोपनिषत्प्रतिपाद्यं मानवानां प्रधानं लक्ष्यं परमात्मानं प्राप्य मुक्ता भवितुमर्हन्ति, अतो वेदान्तो नाम उपनिषदादीनि शास्त्राण्येव वेदान्तः, श्रीअमरसिंहोमरकोशकारोमरकोशेन्तपदस्य नैकानर्थान् कथयति तद्यथा –

**अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनो स्त्रियाम्**[१] ।

**अन्तो जघन्यं चरममन्त्यपाश्चात्यपश्चिमम्**[२] ।

अतो वेदान्तो नाम वेदोम्यते ज्ञायते प्राप्यते गम्यते अस्मिन्निति वेदान्तः, वेदा भगवतो वाङ्मयस्वरूपमस्ति, अतो भगवतो ज्ञानं वा प्राप्तिरनेन वेदान्तशास्त्रेण भवितुमर्हति, इत्थं वेदान्तपदस्य निर्वचनं विधायोपप्रकरणमत्रैव समाप्यते ।

---

[1] अमरकोशः २।८।११६

[2] अमरकोशः ३।१।८१

३.६ विमर्शपदस्य निर्वचनम् ।

विमृश्यते नाम स्पृश्यते अनेनेति विमर्शः, अत्र व्युपसर्गपूर्वाद् मृश-आमर्शने[१] (आमर्शनं स्पर्शः) इत्यस्माद्धातोः ''हलश्च[२]'' इत्यनेन करणे घञि प्रत्ययेनुबन्धलोपे, ''पुगन्तलघूपधस्य च[३]'' इति पाणिनीयसूत्रेण लघूपधाया गुणे, ''उरण्रपरः[४]'' इति पाणिनीयसूत्रेण रपरत्वे, स्वादिकार्ये च विमर्शशब्दो निष्पद्यते, तस्य विमर्शो नाम परिशीलनम्, अत्र परि उपसर्गात् ''शील उपधारणे[५]'' (उपधारणमभ्यासः) इत्यस्माद्धातोः ''करणाधिकरणयोश्च[६]'' इत्यनेन करणे ल्युटि, युवोरनाकौ[७]'' इति पाणिनीयसूत्रेण 'यु' इत्यस्य स्थाने अनादेशे सति परिशीलनं शब्दो निष्पद्यते, अथवा परिशील्यते यस्मात् तत्परिशीलनम्, वा परिशीलनं यत् तत् परिशीलनम्, परिशील्यतेस्मिन्निति परिशीलनम्, इत्थं परिशीलनस्यानेका व्युत्पत्तयो भवन्ति, पुराणेषु सांख्ययोगवेदान्तस्य विमशरः, परिशीलनं, चिन्तनम् अभ्यासः क्रियते । पुराणेषु सांख्ययोगं दर्शं दर्शं मे मन उत्कण्ठायते, कथं यत् - सांख्यशास्त्रमिदं जन्मादीनां संस्काराणां वाहकरूपं सूक्ष्मशरीरं स्वीकरोति, अतः सर्वप्रथमं सांख्यदर्शनस्य कर्तॄणां परिचयः, सांख्यदर्शनस्य भाष्यकाराणां परिचयः, सांख्यदर्शनस्य वर्ण्यविषयः संक्षेपेण प्रस्तूयते तद्यथा -

---

1 तुदादिधातुः १५१९

2 पा.सू. ३।३।११७

3 पा.सू. ७।३।८६

4 पा.सू. १।१।५१

5 चुरादिधातुः २०२३

6 पा.सू. ३।३।११७

7 पा.सू. १।१।५१

३.७ सांख्यदर्शनस्य कर्तृपरिचयः ।

सम्यक् त्तमपूर्वकं ख्यानं कथनं यस्याः सेति संख्या, संख्यामधिकृत्य कृतो ग्रन्थः सांख्यम् , सांख्यपदस्य व्याख्यामपि नैकानि पुराणान्यनेन प्रकारेण कुर्वन्ति तद्यथा -

**प्रसंख्यानाय तत्त्वानां समन्तादात्मदर्शने**[1] **।**

**सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते**[2] **।**

**सांख्यैः संख्यातः संख्येयैः**[3] **।**

**सांख्यदर्शनमेतत्परिसंख्यानमुच्यते**[4] **।**

वेदस्मृतिपुराणमहाभारतसांख्यसूत्राणामुपरि लिखिताष्टीकाः प्रटीकाश्च सांख्यशास्त्रस्य चिन्तकानामाचार्य्याणां च परम्पराया उल्लेखं कुर्व्वन्ति । सांख्यशास्त्रस्य रचयितृषु सर्वप्रथमं स्थानं कपिलस्य वर्तते, अन्येपि सांख्यदर्शनस्य कर्तारस्सन्ति, तेषां नामान्यनेन प्रकारेण सन्ति तद्यथा -

३.७.१ कपिलः ।

३.७.२ आसुरिः ।

३.७.३ पञ्चशिखः ।

३.७.४ विन्ध्यवासी ।

३.७.५ जैगीषव्यः ।

३.७.६ वार्षगण्यः ।

३.७.७ वोढुः ।

३.७.८ सनकादयः ।

---

1 श्रीमद्भागवतपुराणम् ३।२४।२

2 मत्स्यपुराणम्

3 चरकसंहिता-शरीरस्थानम्

4 ब्रह्मपुराणम्

एते मुख्यतया सांख्याचार्य्याः सन्ति, एतेषां जीवनकवनादिकं संक्षेपेण प्रस्तूयते तद्यथा –

३.७.१ कपिलः ।

**कपिलं परमर्षिं च यं प्राहुर्यतयः सदा ।**
**अग्निः सः कपिलो नाम सांख्ययोगप्रवर्तकः[1] ।।**

विभिन्नानि मतानि सन्ति, तथापि प्रायः सर्वे विद्वांसः सांख्यशास्त्रस्य प्रवर्तकाय कपिलाय प्रवर्ततकत्वेन मान्यतां प्रदत्तवन्तः सन्ति । ऋग्वेदाराभ्य महाभारतपुराणोपनिषत्स्वपि कपिलस्यैवोल्लेखोवलोक्यते । श्रीमद्भागवतपुराणस्य अनुसारं कपिलस्य पिता कर्दमः, तथा माता देवहूतिर्वर्तते, सः कपिलो भगवतो विष्णोः पञ्चमोवतारः कथितोस्ति[2] । अयमेव कालकवलितस्य सांख्यशास्त्रस्य उपदेशमासुरये प्रदाय प्रवर्तयामास । अस्मिन् सांख्यशास्त्रे ब्रह्माण्डस्य सर्वेषां तत्त्वानां निरूपणं कृतमस्ति यथा –

**पञ्चमे कपिलो नाम सिद्धेशः कालविप्लुतम् ।**
**प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्[3] ।।**

अयमेवादिमो विद्वान् वर्तते, स एव सांख्यशास्त्रप्रवर्तकः कपिलो जिज्ञासवे शिष्यायासुरये सांख्यशास्त्रस्योपदेशं प्रददौ । अयमेव भगवान् रघुवंशीयस्य राज्ञः सगरस्य षष्टिसहस्रपुत्रान् भस्मीकृतवान् इति श्रीमद्भागवतमहापुराणस्य मतमिदं प्रदत्तमस्ति[4] ।

मत्स्यपुराणस्य मतमिदमस्ति यद् – भगवान् कपिलः सांख्यशास्त्रस्य प्रवक्ता वर्तते तद्यथा –

**सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते ।**

1 महाभारतम्-वनपर्व २२१।२१

2 श्रीमद्भागवतपुराणम् ३।२४

3 योगसूत्रभाष्यम् १।१२५

4 श्रीमद्भागवतपुराणम् १।८।१२

**एतत्तत्त्वात्मकं कृत्वा जगद्वेधा अजीजनत्[१] ।।**

अयमेवादिमो विद्वान् वर्तते, स एव सांख्यशास्त्रप्रवर्तको महर्षिकपिलः सांख्यशास्त्रस्य सर्वान् सिद्धान्तान् व्यवस्थाय शिष्यायासुरये सांख्यशास्त्रमुपदिश्य षष्टितन्त्रनामानं ग्रन्थं रचितवान् यथा - तेन च बहुधा कृतं तन्त्रम् अर्थात्पञ्चशिखेन बहुधा कृतं तन्त्रम् । षष्टितन्त्राख्यं षष्टिखण्डकृतमिति[२] ।

अनया दृष्ट्या महर्षिकपिलः सांख्यशास्त्रस्य प्रणेत्राचार्यत्वेन ख्यातिम् आप्तवान् । सांख्यकारिकाकार ईश्वरकृष्णः सप्तदशीयकारिकायां लिखति यद् -

**एतत्पवित्रमग्र्यं मुनिरासुरयेनुकम्पया प्रददौ ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्[३] ।।**

अनेनाधारेण महर्षिकपिलः सांख्यशास्त्रस्य प्रवर्तकः सर्वैर्विद्वद्भिः कथितो वर्तते ।

३.७.१.१ कपिलस्य जन्मसमयः ।

महर्षिकपिलस्य जन्मसमयस्य विषये नैकानि प्रमाणानि प्राप्तानि सन्ति, यथा - महर्षिकपिलस्याविर्भावो रामायणमहाभारताभ्यां पूर्वमेव विद्यते । वाल्मीकीयस्य रामायणस्य बालकाण्डे भगवतः श्रीरामस्य पूर्ववंशपरम्पराया उल्लेखस्य प्रसङ्गे सगरस्य चरिते निर्देशो वर्तते[४] । महाभारतस्य शान्तिपर्वणि कपिलासुर्योः संवादोस्ति[५] । श्वेताश्वेतरादिनीषूपनिषत्सु सांख्यदर्शनशास्त्रस्य प्रवर्तकस्याचार्यरूपे समुल्लेखः संप्राप्यते तद्यथा -

---

1 योगसूत्रभाष्यम् १।१२५

2 ब्रह्मसूत्रं शांकरभाष्यम् २।१।१

3 सांख्यकारिका-का.सं. १७

4 वा. रा. बालकाण्डः-अ. ७०

5 महाभारतम्-शान्तिपर्व-अ. ३२६

ऋषिप्रसूतं कपिलं यस्तमग्रे ज्ञाने बिभर्ति जायमानं च पश्येत्[१] ।

पाञ्चरात्रसम्प्रदायस्य अहिर्बुध्न्यसंहितायां कपिलमुनेः प्रादुर्भावः प्रथमयुगस्यान्ते तथा त्रेतायुगस्य प्रारम्भे जन्मसमयः सिद्धो भवति, तदनुसारं त्रेतायुगस्य प्रारम्भे संसारस्य मोहाकुले व्याकुलत्वाज्जगतः सुव्यवस्थायै महर्षिकपिलः सांख्यशास्त्रस्य प्रणयनं कृतवान् तद्यथा –

**ततो महाकुले लोके लोकतन्त्रविधायिनः ।**

**कपिलश्च पुराणार्षिरादिदेवः समुद्भवः ।**

**हिरण्यगर्भो लोकादिरहं पशुपतिः शिवः[२] ॥**

प्रसिद्धो दार्शनिकः पण्डित उदयवीरशास्त्री स्वसांख्यदर्शनस्येतिहासे मतमिदमपुष्णात् । वाल्मिकीयरामायणस्य नैकेषूल्लेखेष्वपि तथ्यस्यास्य नितरां पुष्टिर्भवति । अनेकेषां विदुषां मतमिदमस्ति यद् – महर्षिकपिलस्य पित्राश्रमः सरस्वतीनदीतटे आसीत् । विष्णुपुराणेपि कृतयुगे महर्षिकपिलस्य पित्राश्रमस्य स्थितेरुल्लेखः सम्प्राप्यते यथा –

**कृते युगे परमज्ञानं कपिलादिस्वरूपधृक् ।**

**ददाति सर्वभूतानां सर्वभूतहिते रतः[३] ॥**

एतेषां शास्त्राणामाधारेण सांख्यशास्त्रस्य प्रणेता कपिलमुनिः सप्तशताब्दीमभितः, अथवा सप्तशताब्दीतः पूर्वमेव प्रादुर्भतः, इति स्वीकारं कर्तुं शक्नुमः ।

अनेन प्रकारेण सांख्यशास्त्रस्य प्रवर्तकस्य महर्षिकपिलस्य जीवनकवनमत्रैव समाप्यते ।

---

1 श्वेता. उ. ५।२

2 म. भा. सांख्यम्–पृ. सं. ३८

3 विष्णुपुराणम् ३।२।५४

३.७.२ आसुरिः ।

**एतत्पवित्रमग्र्यं मुनिरासुरयेनुकम्पया प्रददौ ।**
**आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम्[1] ।।**

परतत्त्वस्वरूपप्रदर्शनाय प्रवृत्तेषु दर्शनेषु कपिलप्रणीतस्य सांख्यदर्शनस्यापि मुख्यं स्थानं सर्व एव दार्शनिका अभ्युपगच्छन्ति । दार्शनिकानां पन्थानः कामं विभिन्ना भवेयुः, किन्तु वेदमूलकत्वेन समेषां दर्शनानामेकत्वसाधनं दुष्करं नास्ति । कपिलकणादगौतमव्यासजैमिनि-पतञ्जलीनां महर्षीणां चिन्तशक्तेः अतिशयप्रसूतानीमानि विभिन्नमार्गगामीनि, तथाप्यज्ञातार्थज्ञापकत्वेन तुल्यं प्रमाणमश्नुवते ।

शतपथब्राह्मणस्यानुसारमयमप्यासुरिरेको वैदिकः कर्मकाण्डी मीमांसको वर्तते, यः कर्मतो विरक्तो जिज्ञासुभावेन महर्षिकपिलस्य शरणं गत्वा सांख्यशास्त्रस्य शिक्षामवाप्य सांख्यशास्त्रस्य जयमङ्गलामाठर-वृत्त्यादिनीषु टीकासूल्लेखं विधाय महर्षिकपिलेन आसुरये सांख्यशास्त्रस्य ज्ञानप्रदानस्य कथनमस्ति । अस्यासुरेरेकोपि ग्रन्थः समुपलब्धो नास्ति, किन्तु हरिभद्रकृतायां षड्दर्शननामिकायां टीकायामेकः श्लोको विद्यते तद्यथा -

विविक्ते दृक्परिणतौ बुद्धौ भोगोस्य कथ्यते ।
प्रतिबिम्बोदयः स्वच्छो यथा चन्द्रमसोम्भसि[2] ।।

एतेषामाधारेण वयं कथयितुं शक्नुमो यद् - अनेनाचार्यासुरिणा सांख्यशास्त्रस्य संरचना कृतास्ति । पञ्चशिखाचार्यो महर्षिकपिलेन विरचितस्य तन्त्रस्य तथा आसुरिविरचितस्य वाङ्मयस्य स्वषष्टितन्त्रे समावेशमकरोत् , अतो वर्तमानसमये षष्टितन्त्रस्य लुप्तत्वेन महर्षिकपिलस्य आसुरेरपि ग्रन्था लुप्ताः सन्ति[3] ।

---

[1] सांख्यदर्शनम् - प्रस्तावना-पृं सं. २७

[2] म. भा. सांख्यम्-पृ. सं. ३९

[3] म. भा. सांख्यम्-पृ. सं. ३९

३.७.३ पञ्चशिखः ।

अयमपि सांख्यशास्त्रस्य प्रसिद्ध आचार्यो वर्तते, यः सांख्यशास्त्रस्य प्रवर्तकस्य कपिलस्य प्रशिष्योस्ति । सांख्यपरम्परायामयं पञ्चशिखः षष्टितन्त्रस्य कर्ता वर्तते, इति सर्वे विद्वांसः स्वीकारं कुर्वन्ति । महाभारतस्य शान्तिपर्वणोनुसारं कपिलानामिकाया ब्राह्मण्या दुग्धपानेन भरणपोषणेन चायं पञ्चशिखाचार्यः कापिलेयनामधेयेन विश्रुतः संजातः तद्यथा -

**ब्राह्मणी कपिला नाम काचिदासीत्कुटुम्बिनी ।**
**तस्याः पुत्रत्वमागम्य स्त्रियः सः पिबति स्तनौ ।**
**ततः सः कापिलेयत्वं लेभे बुद्धिं च नैष्ठिकीम्[1] ।।**

अयमेव कापिलेयत्वेन विश्रुतो विख्यातश्च पञ्चशिखाचार्यत्वेन लोके प्रसिद्धो जातः तद्यथा -

पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।
पञ्चज्ञः पञ्चकृत्पञ्चगुणः पञ्चशिखः स्मृतः[2] ।।

महाभारतस्यैकस्मिन्स्थलेयमेव पञ्चशिखाचार्यः पराशरसगोत्रो भिक्षुरपि कथितो वर्तते तद्यथा -

पराशरसगोत्रस्य वृद्धस्य सुमहात्मनः ।
भिक्षोः पञ्चशिखस्याहं शिष्यः परमसम्मतः[3] ।।

सम्प्रति पञ्चशिखाचार्येण विरचितस्य षष्टितन्त्रस्य सांख्यग्रन्थस्य उपलब्धिर्नास्ति, किन्तु सांख्यशास्त्रस्य योगदर्शनस्य विभिन्नेषु ग्रन्थेषु नैकानि समुद्धरणानि प्राप्यन्ते[4] । सांख्यशास्त्रस्य सूत्रद्वये पञ्चशिखाचार्यस्य समुल्लेखो

---

1 महाभारतम्-शान्तिपर्व-अ. १२।२१८।१५-१६

2 महाभारतम्-शान्तिपर्व-अ. १२।२१८

3 महाभारतम्-शान्तिपर्व-अ. १२।३२०।२४

4 योगभाष्यम्- १।४

वर्तते[१] । महाभारतस्य शान्तिपर्वणि 'पञ्चशिखः' इति पदस्य व्युत्पत्तिः समुपलब्धा वर्तते, तद्यथा –

**पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः ।**
**पञ्चज्ञः पञ्चकृत्पञ्चगुणः पञ्चशिखः स्मृतः[२] ।।**

अनेन प्रकारेण महर्षिकपिलस्य सिद्धान्तानामनुयायित्वेन 'कापिलेयः' इति नाम्नः सार्थकता प्रतीता भवति, राजा जनकः पञ्चशिखाचार्यं गुरुं मन्यते, अनेन प्रकारेण सांख्यशास्त्रस्य प्रवर्तकस्य पञ्चशिखाचार्यस्य जीवनकवनमत्रैव समाप्यते ।

३.७.४ विन्ध्यवासी ।

स च भगवतो वर्षस्य शिष्यो नन्दकालीनः, पाणिनिसूत्राणां संग्रहाख्यटीकायाः, कस्यचित्कोशस्य कर्ता, दाक्षायणः पतञ्जलेरपि पुरोगामी सांख्ययोगाचार्यश्च[३] ।

अयमेव विन्ध्यनामकस्य पर्वतस्य वासित्वेन विन्ध्यवासी विन्ध्यवासत्वेन विश्रुतो भगवतो वर्षस्य शिष्यो वर्तते । अयं विन्ध्यवासी सांख्यशास्त्रस्य प्रसिद्ध आचार्योस्ति, अस्य मौलिकं नाम रुद्रिलो वर्तते सांख्यकारिकाया युक्तिदीपिकायामन्यस्यां टीकायां च विन्ध्यवासस्य सिद्धान्तानां समुल्लेखो वर्तते, अनेन प्रतीतिर्भवति यद् – अनेनाचार्येण कस्यचित्प्रौढस्य सांख्यग्रन्थस्य रचना कृता वर्तते[४] ।

अस्याचार्यस्य जन्मसमयः चतुर्थशताब्दीभागस्यान्तिमाद्भागादारभ्य पञ्चम्याश्शताब्द्या मध्ये वर्तते । केचन विद्वांसोयमेव व्याडी वर्तते, इति कथयन्ति, अतोयमेव वर्षाचार्य्यस्य प्रसिद्धस्य वैयाकरणस्य शिष्यस्तथा

1 सांख्यसूत्रम्-५।३२, ६।६०

2 महाभारतम्-शान्तिपर्व-अ. १२।२।८

3 माठरवृत्तिभूमिका- पृ. सं. ३

4 म. भा. सांख्यम्-पृ. सं. ४१

पाणिनेः सहपाठी वर्तते । नन्दसमकालीनो नन्दमन्त्री कथितोस्ति । महाभाष्यकारेण भगवता पतञ्जलिना लक्षश्लोकात्मकस्य संग्रहस्य रचयिता कथितः ।

अनेन विवरणेन स्पष्टं प्रतीतम्भवति यद् - अयमेव विन्ध्यवासी, अयमेव विन्ध्यवासः, अयमेव व्याडिरस्ति, अतोस्य स्थितिकाल ईसवीयपूर्वीयायां चतुर्थ्यां शताब्द्यामस्तीति, तथा च पातञ्जलमहाभाष्यस्य भगवतः समकालीनो वर्तते, स्वीकर्तुं शक्नुमः, अनेन प्रकारेण सांख्यशास्त्रस्य प्रवर्तकस्य विन्ध्यवास्याचार्यस्य जीवनकवनमत्रैव समाप्यते ।

**३.७.५ जैगीषव्यः ।**

**सृष्टिः समस्ता त्रिगुणात्मिकैषा**
**मूलं च तस्याः प्रकृतिः स्वयम्भूः ।**
**तस्याश्च भोक्ता पुरुषः शरीरी**
**उभावपीमौ शिसाभिवन्द्यौ ॥**
**संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।**
**तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिताः[१] ॥**

सर्वोपि दार्शनिकः किमिदं जगत् ? कस्मादिदं प्रावर्तिष्ट ? इति जगत्तत्त्वपरीक्षणेन सह स्वीयं दर्शनविषयं निरूपयति, तेष्वयमपि जैगीषव्यः सांख्यशास्त्रस्य प्रमुख आचार्यो वर्तते । अश्वघोषेण विरचिते बुद्धचरिते जैगीषव्यस्य सांख्याचार्येषु प्रामुख्येन गणना कृता वर्तते[२] । अयमेव विशिष्टायाः प्रतिभाया धनी सिद्धयोगी चासीत् । वाचस्पतिमिश्रः तत्त्वकौमुद्यां स्मरणं कृतवान्[३] । ब्रह्माण्डपुराणस्यानुसारं जैगीषव्यस्य पिता

1 सांख्यदर्शनम् - प्रस्तावना-पृं सं. ७

2 म. भा. सांख्यम्-पृ. सं. ४१

3 सांख्यतत्त्वकौमुदी-टीकायाम्-कारिका २

शतशलाको वर्तते[1] । विभिन्नेषु पुराणेषु सांख्याचार्यस्य जैगीषव्यस्य तिस्रः पत्न्यः सन्ति, तासां तिसृणां पत्नीनां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. पर्णा ।

२. एकपाटला ।

३. योगवती ।

सांख्याचार्यस्य जेगीषव्यस्य शिष्यस्य नाम असितदेवलो वर्तते[2] । महाभारतस्य शान्तिपर्वणि असितदेवलेन साकं ब्रह्मप्राप्तिविषयकः संवादः सुप्रसिद्धो वर्तते[3] । योगसूत्रस्य व्यासभाष्ये सांख्याचार्यो जैगीषव्यो जितेन्द्रियः कथितोस्ति तद्यथा –

**चित्तेकाग्र्यादप्रतिपत्तिरेवेति जैगीषव्यः**[4] ।।

सांख्याचार्यस्य जैगीषव्यस्यैकापि रचना समुपलब्धा नास्ति, किन्तु महाभारतादिषु ग्रन्थेषु सांख्याचार्यस्य जैगीषव्यस्य सिद्धान्तानां समुल्लेखो विद्यते । महाभारतस्य सांख्याचार्यस्य जैगीषव्यस्य विषये चर्चाकारणेन सांख्याचार्यस्य जैगीषव्यस्य स्थितिकालो महाभारतात्पूर्ववर्ती भवितुमर्हति । केचन विद्वांसः सांख्याचार्यस्य जैगीषव्यस्य स्थितिकालं पञ्चशिखस्यानन्तरमेव स्वीकुर्वन्ति, यद्यपि कूर्मपुराणं पञ्चशिखस्य सांख्याचार्यं जैगीषव्यं शिष्यत्वेन स्वीकरोति ।

अनेन प्रकारेण सांख्यशास्त्रस्य प्रवर्तकस्य जैगीषव्यस्याचार्यस्य जीवनकवनमत्रैव समाप्यते ।

---

1 ब्रह्माण्डपुराणम्–३।१०।२०

2 म. भा. सांख्यम्–पृ. सं. ४१

3 महाभारतम्–शान्तिपर्व २२२

4 योगसूत्रव्यासभाष्यम् – २।५५

३.७.६ वार्षगण्यः ।

दोषाणां च गुणानां च प्रमाणं प्रविभागतः ।

कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्[१] ।।

अस्य वार्षगण्यस्य नामधेयमपि महाभारतस्य सांख्याचार्याणां सूचौ समुपलब्धमस्ति । अस्य वार्षगण्यस्य स्थितिकाल ईश्वरकृष्णात्पूर्वस्तथा विन्ध्यवासीतः पश्चादेव वर्तते । अस्य वार्षगण्यस्यैकापि रचना समुपलब्धा नास्ति, किन्तु महाभारतादिषु ग्रन्थेषु सांख्याचार्यस्य जैगीषव्यस्य सिद्धान्तानां समुल्लेखो विद्यते । नैकेषामेतस्य वार्षगण्यस्य सांख्याचार्यस्यानुयायिनः 'वार्षगणाः' इति कथयित्वा नैकेषां सिद्धान्तानामुल्लेखं कुर्व्वन्ति तद्यथा –

१. मूर्तिव्यवधिजातिभेदाभावान्नास्ति मूलपृथक्त्वमिति वार्षगण्यः ।

२. श्रोत्रादिवृत्तिरिति वार्षगणाः ।

३. साधारणो हि महान् प्रकृतित्वादिति वार्षगणानां पक्षः ।

४. एकरूपाणि तन्मात्राणीत्यन्ये, एकोत्तराणीति वार्षगण्यः ।

५. तथा च भगवान् वार्षगण्यः पठति[२] ।

अनेन विवरणेन स्पष्टं प्रतीतम्भवति यद् – वार्षगण्यः सांख्यशास्त्रस्य प्रतिष्ठित आचार्यो वर्तते । सांख्यशास्त्रस्य सिद्धान्तानां विषये वार्षगण्यस्य विशिष्टा मान्यता चासीत् । सांख्यतत्त्वकौमुदीकारो वार्षगण्यस्य विशेषरूपेणोल्लेखं करोति तद्यथा –

पञ्चपर्वाविद्या इत्याह स्म भगवान् वार्षगण्यः[३] ।

अनेन प्रकारेण सांख्यशास्त्रस्य प्रवर्तकस्य वार्षगण्यस्याचार्यस्य जीवनकवनमत्रैव समाप्यते ।

---

[1] बुद्धचरितम् – १२।६७

[2] म. भा. सांख्यम्–पृ. सं. ४३

[3] सांख्यतत्त्वकौमुदी–टीकायाम्–कारिका ४७

३.७.७ वोढुः ।

**सारस्वतस्तथा मोघो धनवाहः सुवाहनः ।**

**कपिलश्चासुरिश्चैव वोढुः पञ्चशिखो मुनिः**[१] ।।

गच्छति काले क्रमेण लोका आयुषा, बुद्ध्या, प्रतिभया, श्रद्धया च विहीनास्तस्य दर्शनस्याध्ययनेध्यापने च क्षीणशक्तयोभवन् । पातञ्जलमहाष्यकारो भगवान् पतञ्जलिः कथयति यद् - यः सर्वथा जीवति वर्षशतं जीवति[२] । अनेन कारणेन विशिष्टानां शास्त्राणां महत्यावश्यकता वर्तते, तत्र नैकेषामाचार्याणां स्वस्य स्वस्य स्वमतानुसारं सारस्वतमोघधनवाहसुवाहनकपिलासुरीणाम् अनन्तरमेव वोढुनामकस्याचार्यस्य स्थितिकालो भवितुमर्हति । अयमपि सांख्यशास्त्रस्य प्रसिद्ध आचार्यो वर्तते, यः सांख्यशास्त्रस्य प्रवर्तकस्य कपिलस्य प्रशिष्योस्ति, तथा वामनपुराणमपि सांख्यवेत्तृत्वेन कथयति तद्यथा -

सांख्यवेत्तारमपरं कपिलं वोढुमासुरिम्[३] ।।

विविधेषु पुराणेषु वोढुं सिद्धिप्राप्तयोगित्वेन स्मृतो वर्तते, सांख्याचार्यस्य वोढुनामकस्यैकापि रचना समुपलब्धा नास्ति, किन्तु महाभारतादिषु ग्रन्थेषु सांख्याचार्यस्य वोढुनामकस्याचार्यस्य सिद्धान्तानां समुल्लेखो विद्यते । भाषाविज्ञानस्य दृष्ट्या वोढुशब्दो वृद्धशब्दाद् व्युत्पन्नो भवितुमर्हति । सर्वे सांख्या विद्वांस ईसवीयात्पूर्वं पञ्चशतवर्षसमीपे स्थितिकालं स्वीकुर्व्वन्ति । ऋषितर्पणस्य विधावपि समुल्लेखो वोढुनामकस्य ाचार्यस्य प्रतिष्ठाया विद्वत्तायाः प्राचीनतायाश्च परिचायको वर्तते[४] । अनेन प्रकारेण सांख्यशास्त्रस्य प्रवर्तकस्य वोढुनामकस्याचार्यस्य जीवनकवनमत्रैव समाप्यते ।

---

[1] पातञ्जलमहाभाष्यम् - आ. १

[2] वामनपुराणम् - १।५३।१४

[3] म. भा. सांख्यम्-पृ. सं. ४४

[4] म. भा. सांख्यम्-पृ. सं. ४४

३.७.८ सनकादयः ।

सांख्यकारिकायाः प्रथमायां कारिकायां गौडपादभाष्ये सनकादीनां नामानि लिखितानि सन्ति तद्यथा –

**सनकश्च सनन्दश्च तृतीयश्च सनातनः ।**

**आसुरिः कपिलश्चैव वोढुः पञ्चशिखस्तथा ।**

**इत्येते ब्रह्मणः पुत्राः सप्त प्रोक्ता महर्षयः[१] ।।**

मुख्यतया सांख्यशशास्त्रस्य सप्ताचार्याः कथिताः सन्ति, ते सप्त महर्षयो ब्रह्मणः पुत्राः कथिताः सन्ति, तेषां सप्तमहर्षीणां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. सनकः ।

२. सनन्दः ।

३. सनातनः ।

४. आसुरिः ।

५. कपिलः ।

६. वोढुः ।

७. पञ्चशिखः ।

किन्तु महाभारतस्य शान्तिपर्वणि महर्षीणां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. सनः ।

२. सनकः ।

३. सुजातः ।

४. सनन्दनः ।

५. सनत्कुमारः ।

६. कपिलः ।

---

[1] पातञ्जलमहाभाष्यम् – आ. १

७. सनातनः ।

एवं सांख्यसूत्रेषु सप्तसु महर्षिषु केवलस्य सनन्दनस्य समुल्लेखो वर्तते तद्यथा –

**लिङ्गशरीरनिमित्तक इति सनन्दनाचार्यः**[१] ।

मुख्यतया सांख्यशशास्त्रस्य सप्ताचार्याः ब्रह्मणः पुत्राः कथिताः सन्ति, तेषु सप्तसु सर्वे विद्वांसः सांख्याचार्यस्य प्रवर्तकत्वेन कपिलं निःसंकोचं निर्विवादं च स्वीकुर्वन्ति । महाभारतकारेण सांख्याचार्याणां सूचावाचार्यस्य गर्गस्य नामधेयमपि वर्तते । औलूक्यदर्शनेनोलूकस्य नामधेयमायाति यथा –

कपिलादासूरिणा प्राप्तमिदं ज्ञानं ततः पञ्चशिखेन तस्माद् भार्गव- उलूकवाल्मीकिहारीतदेवलप्रभृतीनाम्[२] ।

वायुपुराणमपि नैकेषां सांख्यशशास्त्रस्याचार्याणामुल्लेखमनेन प्रकारेण करोति तद्यथा –

**अन्नपादः कणादश्च उलूको वत्स एव च ।**
**योगात्मानो महात्मानो विमला शुद्धबुद्धयः**[३] ।।

नैकानि शास्त्राणि सांख्यशशास्त्रस्याचार्याणां नामान्यनेन प्रकारेण निर्देशं कुर्वन्ति तद्यथा –

१. पराशरः ।

२. शुकदेवः ।

३. भृगुः ।

४. कश्यपः ।

५. नारदः ।

६. पुलस्त्यः ।

---

1 सांख्यसूत्रम् – १

2 माठरवृत्तिः – ७१

3 म. भा. सांख्यम्–पृ. सं. ४७

७. जनकः ।

८. व्यासः ।

९. भीष्मः ।

१०. मरीचिः ।

११. अङ्गिराः ।

१२. इक्ष्वाकुः ।

१३. वामदेवः ।

१४. कुशिकः ।

१५. गौतमः ।

१६. पुनर्वसुः ।

१७. पुलहः ।

१८. मनुः ।

१९. यास्कः ।

२०. आवाट्यः ।

२१. विवस्वान् ।

२२. रैभ्यः ।

२३. कुमारगयः ।

२४. ऋतुः ।

२५. आर्ष्टिषेणः ।

२६. मार्कण्डेयः ।

अनेन प्रकारेण सर्वेषां सांख्यदर्शनस्य कर्तॄणां परिचयं प्रदाय 'सांख्यदर्शनस्य कर्तृपरिचयः' इत्युपप्रकरणमत्रैव समाप्यते[1] ।

३.८ सांख्यदर्शनस्य भाष्यकाराः ।

---

[1] म. भा. सांख्यम्-पृ. सं. ६१

सांख्यदर्शनस्य नैके भाष्यकाराः सन्ति, तेषु विशेधरूपेण निम्नलिखिताः ख्यातिं प्राप्ताः सन्ति तद्यथा –

३.८.१ श्रीमदीश्वरकृष्णः ।

३.८.२ श्रीवाचस्पतिमिश्रः ।

३.८.३ उदयवीरशास्त्री ।

सांख्यदर्शनस्यैतेषु प्रामुख्यं भजमानेषु भाष्यकारेषु सर्वप्रथमं श्रीमदीश्वरकृष्णस्य जीवनकवनादिकं प्रस्तौमि तद्यथा –

३.८.१ श्रीमदीश्वरकृष्णः ।

श्रीमदीश्वरकृष्णस्य विषये नैकेषां विदुषां नैके विचाराः सन्ति, माठरवृत्तिकारो माठराचार्यः 'भगवान्' अथवा 'भगवतोक्तम्' इत्युक्त्वा श्रीमदीश्वरकृष्णस्य भावेन सहोल्लेखं करोति ।

३.८.१.१ श्रीमदीश्वरकृष्णस्य जन्मस्थानम् ।

श्रीमदीश्वरकृष्णस्य जन्मस्थानसम्बन्धस्य विषयकज्ञानं किमपि समुपलब्धं नास्ति, तथापि नैकेषां विदुषां नैके विचाराः सन्ति यथा – श्रीमदीश्वरकृष्णस्य जन्म प्रथमशताब्दां वा द्वितीयशताब्द्यामस्ति, अयमेव आर्याछन्दसा षष्टितन्त्रमाधारीकृत्य तस्य सर्वेषां सिद्धान्तानां तथाभिप्रायः सरलायां शैल्यां सप्ततिकारिकासु निबद्धो वर्तते । षष्टितन्त्रे वर्णितानामाख्यानां तर्काणां वितर्काणां सिद्धान्तानां खण्डनं कृतमस्ति । अयमेव श्रीमदीश्वरकृष्णः स्वस्मिन् ग्रन्थे निरीश्वरस्य सांख्यस्य मान्यतां प्रदाय सांख्यदर्शनस्य मुख्यानि पञ्चविंशतितत्त्वानि मन्यते ।

३.८.१.२ श्रीमदीश्वरकृष्णेन प्रणीता सांख्यकारिका जन्मस्थानम् ।

श्रीमदीश्वरकृष्णेन विरचितस्य सांख्यशास्त्रस्य समुपलब्धेषु शास्त्रीयग्रन्थेषु प्राचीनतमो ग्रन्थो वर्तते । सांख्यसिद्धान्तानां लोकप्रियताया महाभारत- पुराणादिषु ग्रन्थेषु समुल्लेखः कृतोस्ति । दर्शनजगत आवश्यकता श्रीमदीश्वरकृष्णेन सांख्यकारिकायाः प्रणयनं कृत्वा पूरिता । ईसवीयपूर्वां

द्वितीयशताब्दीमभितः द्विसप्ततिषु कारिकास्वेकोनसप्ततिकारिकासु सूत्रात्किायां शैल्यां सांख्यसिद्धान्तानां सरलया रीत्या प्रतिपादनं कृतमस्ति, तथा चान्तिमासु त्रिकारिकासु सांख्यशास्त्रस्य आचार्यपरम्पराया दिग्दर्शनं कृतं वर्तते । अयं सम्पूर्णो ग्रन्थ आर्याछन्दसा निबद्धोस्ति । विद्वत्परम्परायामस्य ग्रन्थस्य त्रीणि नामानि सुप्रसिद्धानि सन्ति, तानि नामान्यनेन प्रकरणेन सन्ति तद्यथा –

१. सांख्यसप्ततिः ।

२. हिरण्यसप्ततिः ।

३. सुवर्णसप्ततिः ।

अस्य ग्रन्थस्योपजीव्यम्मूलरूपेण षष्टितन्त्रनामको ग्रन्थः कथितोढस्ति, तत्र सांख्यसिद्धान्ता विस्तारेण प्रस्तुतास्सन्ति, किन्तु सांख्यकारिकायामस्यां दृष्टान्तस्य आख्यायिकानां प्रतिपक्षादीनां च विवरणं श्रीमदीश्वरकृष्णेन विरचितायां कृतं नास्ति, सम्प्रति श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया रचनाकालो मया प्रस्तूयते तद्यथा –

३.८.१.३ श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया रचनाकालः ।

महाभारतस्य रचनाकालस्य निर्धारणानन्तरमेव सांख्यदर्शनस्य महत्त्वपूर्णस्य श्रीमदीश्वरकृष्णेन विरचितस्य सांख्यकारिकाग्रन्थस्य निर्धारणमुचितं प्रतिभाति । महाभारते प्रतिपादितानां सांख्यसिद्धान्तानां प्राचीनता सिद्धा भवितुमर्हति, येन कारणेन सांख्यकारिकायाः सिद्धान्तानां तुलनां कुर्वन्ति कानिचन तथ्यान्यनेन प्रकारेण सन्ति तद्यथा –

१. इदमपि सम्भवितुमर्हति यद् – महाभारतात्पूर्वं सांख्यस्य केचन ग्रन्था आसन् , किन्तु ते ते सांख्यग्रन्थाः कालकवलिताः संजातास्तथा सम्प्रति सांख्यदर्शनस्य प्रतिनिधिरूपः श्रीमदीश्वरकृष्णेन विरचितः सांख्यकारिकाग्रन्थः समुपलब्धो वर्तते ।

२. यदि वयं सांख्यशास्त्रस्यय ग्रन्थेभ्यः सांख्यकारिका, तदुपरि लिखिताः टीकाः प्रटीका निष्कासयिष्यामस्तर्हि सांख्यसाहित्यमल्पमेव

भवितुमर्हति, अनेन कारणेन निरीश्वरस्य सांख्यस्य प्रतिपादनदृष्ट्या सांख्यदर्शनस्य महत्त्वपूर्णस्य श्रीमदीश्वरकृष्णेन विरचितस्य सांख्यकारिकानामकस्य ग्रन्थस्य स्वीकरणमेवोचितं प्रतीतं भवति ।

३. महाभारतपुराणादिषु ग्रन्थेष्वीश्वरस्य सत्ताया अवश्यमेव स्वीकारः कृतो वर्तते, किन्तु सांख्यदर्शनस्य महत्त्वपूर्णस्य श्रीमदीश्वरकृष्णेन विरचिते सांख्यकारिकाग्रन्थे ईश्वरस्यास्तित्वं स्वीकृतं नास्ति, किन्तु पुरुषस्य प्रकृतेरेतयोः नित्यतत्त्वयोः स्वीकारः कृतः, अतः सांख्यकारिकाग्रन्थो निरीश्वरस्य सांख्यस्य प्रतिपादको वर्तते, कथं यद् – इतः पूर्वमेषां सिद्धान्तानां प्रतिपादको ग्रन्थः समुपलब्धो नास्ति, अनेन कारणेन निरीश्वरस्य सांख्यस्य प्रतिपादनाय सांख्यकारिकानामको ग्रन्थ आद्यग्रन्थोस्ति ।

४. आद्याचार्येण भगवता कपिलेन सांख्यसूत्रादीनां ग्रन्थानामुपलब्धिर्नास्ति, अतः सांख्यशास्त्रस्य प्रामाणिकः, प्राचीनः प्रतिनिधिरूपश्च सांख्यकारिकानामको ग्रन्थो वर्तते, तथा च सांख्यशास्त्रस्य शास्त्रीयं प्राचीनं च स्वरूपं प्रस्तोतुमयमेव आधारस्तम्भो वर्तते, अतो यया कयाचिदपि दृष्ट्या सांख्यदर्शनस्य महत्त्वपूर्णस्य श्रीमदीश्वरकृष्णेन विरचितस्य सांख्यकारिकाग्रन्थस्य महत्त्वं कदाचिदपि न्यूनं भवितुं नार्हति , अथवा साख्यकारा इममेव श्रीमदीश्वरकृष्णेन विरचितं सांख्यकारिकानामके ग्रन्थं ध्यायं ध्यायं स्वमतं स्थापयन्ति, इदमेव मतं स्वीकृत्य नैकैः सांख्यतत्त्वज्ञैः श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकायाष्टीका नैकाः प्रणीतास्सन्ति, अतः सर्वासां टीकानां संक्षेपेण विवरणं करोमि तद्यथा –

३.८.१.४ श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकायाष्टीकाः ।

श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकायाष्टीका नैका विद्वद्भिः प्रणीतास्सन्ति तद्यथा -

३.८.१.४.१ माठरवृत्तिः ।

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया नैकासु टीकासु त्रिसप्ततिकारिकास्वाचार्यमाठरेण प्रणीता माठरवृत्तिनाम्नी टीका वर्तते ।

३.८.१.४.२ युक्तिदीपिका ।

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया अत्यन्तमहत्त्वपूर्णा विस्तृता तथा मर्मस्पर्शिणी युक्तिदीपिका नाम्नी टीका वर्तते, अस्याष्टीकायाः कर्तुर्नामोल्लेखो न विद्यते, किन्तु युक्तिदीपिकाया अन्ते 'कृतिरियं वाचस्पतिमिश्राणाम्' इत्युल्लेखेन अस्याष्टीकायाः कर्ता वाचस्पतिमिश्रनामाचार्यो वर्तते, इति बहवो विद्वांसः स्वीकुर्वन्ति ।

३.८.१.४.३ गौडपादभाष्यम् ।

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया नैकासु टीकासु आद्यशंकराचार्यस्य शिष्येण गौडपादेन प्रणीता गौडपादभाष्यनाम्नी टीका वर्तते

३.८.१.४.४ जयमङ्गला ।

श्रीमदीश्वरकृष्णेन विरचितायाःसांख्यकारिकाया नैकासु टीकासु भगवता शङ्कराचार्येण प्रणीता जयमङ्गलानाम्नी टीका वर्तते । तत्र जयमङ्गलाटीकायामेकः श्लोको वर्तते तद्यथा -

अभिगततत्त्वालोकं लोकोत्तरवादिनं प्रणम्य मुनिम् ।
क्रियते सप्ततिकारिकायाष्टीका जयमङ्गला नाम ।।

अस्या जयमङ्गलाटीकायाः कर्तृविषये विशेषेण वैमत्यं वर्तते, किन्तु केचन विद्वांसोस्या जयमङ्गलाटीकायाः कर्ता शङ्करार्यनामको विज्ञानभिक्षुरस्तीति कथयन्ति ।

३.८.१.४.५ सांख्यतत्त्वकौमुदी ।

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया नैकासु टीकासु आचार्यवाचस्पतिमिश्रेण प्रणीता सांख्यतत्त्वकौमुदीनाम्नी टीका वर्तते । इयं सांख्यतत्त्वकौमुदी श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया अत्यन्तमहत्त्वपूर्णा विस्तृता तथा मर्मस्पर्शिणी गम्भीररा च टीका वर्तते, अस्याः सांख्यतत्त्वकौमुद्या नैकाः प्रटीकाः सन्ति –

| क्रमः | प्रटीकाया नाम | प्रटीकायाः कर्तृनाम |
|---|---|---|
| १. | सारबोधिनी | पण्डितशिवनारायणशास्त्री |
| २. | विद्वत्तोषिणी | श्रीबालराम–उदासीनः |
| ३. | सांख्यतरु दिवाकरटीका | श्रीवंशीधरमिश्रः |
| ४. | किरणावली | श्रीकृष्णवल्लभाचार्यः |
| ५. | सुषमा | पण्डितहरिरामशुक्लः |
| ६. | तत्त्वप्रकाशिका | श्रीपञ्चाननशास्त्री |
| ७. | पूर्णिमा | श्रीपञ्चाननभट्टाचार्यः |
| ८. | आवरणवारिणी | श्रीकृष्णनाथन्यायपञ्चाननः |
| ९. | प्रभा | श्रीआद्याप्रसादः |
| १०. | ज्योतिष्मती | श्रीरमाशंकरभट्टाचार्यः |
| ११. | सांख्यतरु वसन्तः | श्रीमुडुम्बनरसिंहस्वामी |
| १२. | सांख्यचन्द्रिका | आचार्यनारायणतीर्थः |

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया नैकासु टीकासु आचार्यवाचस्पतिमिश्रेण प्रणीतायाः सांख्यतत्त्वकौमुद्या दशसु टीकास्वियं 'सारबोधिनी' टीका पण्डितशिवनारायणशास्त्रिणा कृता विस्तारदृष्ट्या गहनदृष्ट्या च महत्त्वपूर्णं स्थानमादधाति[1] ।

[1] म. भा. सांख्यम्–पृ. सं. ६५

३.८.२ श्रीवाचस्पतिमिश्रः ।

श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया नैकासु टीकासु आचार्यवाचस्पतिमिश्रेण प्रणीता सांख्यतत्त्वकौमुदीनाम्नी टीका वर्तते । इयं सांख्यतत्त्वकौमुदी श्रीमदीश्वरकृष्णेन विरचितायाः सांख्यकारिकाया अत्यन्तमहत्त्वपूर्णा विस्तृता तथा मर्मस्पर्शिणी गम्भीररा च टीका वर्तते । श्रीवाचस्पतिमिश्रो व्याख्यायां स्वनाम्न उल्लेखं कुर्वन् लिखति तद्यथा –

**मनांसि कुमुदान्येव बोधयन्ती सतां मुदा ।**
**श्रीवाचस्पतिमिश्राणां कृतिः स्तात्तत्त्वकौमुदी ।।**

अनेन श्रीवाचस्पतिमिश्रेण न्यायवार्तिकतात्पर्यटीकायाः समाप्तिसमये श्रीगौतमेन प्रणीतानां न्यायसूत्राणामपि संपादनं कृतमस्ति, न्यायसूचिनिबन्धेपि स्वनाम्न उल्लेखं कुर्वन् लिखति तद्यथा –

**न्यायसूचिनिबन्धोसावकारि सुधियां मुदे ।**
**श्रीवाचस्पतिमिश्रेण वस्वङ्कवसुवत्सर ।।**

अनेन ज्ञायते यत् – श्रीवाचस्पतिमिश्रोष्टनवत्युत्तरनवशते विक्रमवर्षे ग्रन्थस्य समाप्तिमकरोत् , अतः श्रीवाचस्पतिमिश्रस्य जन्म नवशतविक्रमवर्षे वर्तते, किन्तु श्रीवाचस्पतिमिश्रेण कृतायां 'भामती' इति नामिकायामेकस्यां टीकायां श्रीवाचस्पतिमिश्रः स्वयमेव लिखति तथा –

नृपान्तराणां मनसाप्यगम्यां भ्रूक्षेपमात्रेण चकार कीर्तिम्
कार्तस्वरासारसुपूरितार्थसार्थः स्वयं शास्त्रविचक्षणश्च ।
नरेश्वर यच्चरितानुकारमिच्छन्ति कर्तुं न च पारयन्ति
तस्मिन्महीपे महनीयकीर्तौ श्रीमृन्नृगेकारि मया निबन्धः ।।

अनेन ज्ञायते यत् – श्रीवाचस्पतिमिश्रोष्टनवत्युत्तरनवशते विक्रमवर्षे संजातः, इति स्वीकर्तुं न काचिदप्यापत्तिः[१] ।

[1] म. भा. सांख्यम्–पृ. सं. ५७

३.८.३ उदयवीरशास्त्री ।

अर्वाचीनसांख्यसूत्रस्य रचयिता उदयवीरशास्त्री वर्तते, इति बहवो विद्वांसः कथयन्ति । इदमर्वाचीनसांख्यसूत्रं षट्स्वध्यायेषु विभक्तमस्ति, तस्मिन् सप्तविंशत्युत्तरपञ्चशतसूत्राणि सन्ति । प्रथमद्वितीयतृतीयेष्वध्वायेषु सांख्यदर्शनस्य सर्वेषां सिद्धान्तानां विस्तारपूर्वकं विवेचनं विद्यते । चतुर्थाध्याये विशिष्टान्युदाहरणानि सन्ति, तथा पञ्चमाध्याये विरोधिसिद्धान्तानां तर्कपूर्णया पद्धत्या खण्डनं कृतमस्ति, एवमन्तिमे षष्ठेध्याये पुनः सांख्यदर्शनस्य सर्वेषां सिद्धान्तानां उदयवीरशास्त्रिणा प्रस्थापना कृता विद्यते । केचन विद्वांसोर्वाचीनसांख्यसूत्रस्य रचयिता कपिलोस्तीति मन्यन्ते ।

अस्य श्रीउदयवीरशास्त्रिणो जन्मकाल ईसवीयचतुर्थशताब्दीत ईसवीयपञ्चमशताब्दीं यावदस्ति । अस्मिन् अर्वाचीनसांख्यसूत्रे प्रमुखाः तर्का अनेन प्रकारेण कृताः सन्ति तद्यथा -

१. अर्वाचीनसांख्यसूत्रे प्रयुक्तानि वाक्यानि ब्रह्मसूत्रयोगसूत्रवेदान्तदर्शन- सांख्यकारिकादिषु ग्रन्थेषु गृहीतानि सन्ति ।

२. अस्मिन् अर्वाचीनसांख्यसूत्रे सर्वदर्शनसंग्रहकारस्य कुत्राप्युल्लेखो न विद्यते ।

३. अस्मिन् अर्वाचीनसांख्यसूत्रे पञ्चशिखाचार्यस्योल्लेख उदयनशास्त्रिणा कृतो वर्तते ।

४. भगवच्छङ्कराचार्यमाधवाचार्याभ्यां सांख्यदर्शनस्य तत्त्वानां विवेचनस्य समये सांख्यकारिकाया उद्धरणं कृतमस्ति[१] ।

इदमर्वाचीनसांख्यसूत्रमर्वाचीनत्वेपि सांख्यदर्शनस्य सर्वेषां सिद्धान्तानां दृष्ट्यात्यन्तमहत्त्वपूर्णस्थानमादधाति । इदमर्वाचीनसांख्यसूत्रं ध्यायं ध्यायं नैके विद्वांसः टीकाः कृतवन्तः तद्यथा -

---

[1] म. भा. सांख्यम्-पृ. सं. ५४

| क्रमः | टीकाया नाम | प्रटीकायाः कर्तृनाम |
|---|---|---|
| १. | अनिरुद्धवृत्तिः | आचार्योनिरुद्धः |
| २. | सांख्यवृत्तिसारः | श्रीमहादेवसरस्वती |
| ३. | सांख्यप्रवचनभाष्यम् | श्रीविज्ञानभिक्षुः |
| ४. | लघुसांख्यवृत्तिः | श्रीनागेशभट्टः |
| ५. | सांख्यकाष्ठजिह्वः | श्रीविश्वेश्वरमिश्रः |

उदयवीरशास्त्रिणा कृतस्य अर्वाचीनसांख्यसूत्रस्य पञ्च टीकाः सन्ति, तासां जन्मकालस्य वर्णनं संक्षेपेण क्रियते तद्यथा –

१. अनिरुद्धवृत्तिः ।

उदयवीरशास्त्रिणा कृतस्य अर्वाचीनसांख्यसूत्रस्य 'अनिरुद्धवृत्तिः' नाम्न्याः टीकाकार आचार्योनिरुद्धो वर्तते, अस्य जन्मकाल ईसवीयपञ्चदशीयाः शताब्द्या उत्तरार्धे वर्तते ।

२. सांख्यवृत्तिसारः ।

उदयवीरशास्त्रिणा कृतस्य अर्वाचीनसांख्यसूत्रस्य 'सांख्यवृत्तिसारः' नाम्न्याः टीकाकारः श्रीमहादेवसरस्वी वर्तते, अस्यापरं नाम वेदान्ती महादेवोस्ति, सांख्यसूत्रस्य अनिरुवृत्तितः प्रभावितो भूत्वा सांख्यवृत्तिनाम्नीं टीकां कृतवान् , अस्य जन्मकालोऽनिरुद्धाचार्यानन्तरमस्ति ।

३. सांख्यप्रवचनभाष्यम् ।

श्रीविज्ञानभिक्षुणा कृते सांख्यप्रवचनभाष्ये सांख्यसूत्राणामुपरि विस्तृता रचनेयं वर्तते, श्रीविज्ञानभिक्षुः स्वयं वेदान्ती वर्तते, तथापि सांख्यप्रवचनभाष्यस्य रचना सांख्यानां कृते प्रेरणादायिन्यस्ति ।

४. लघुसांख्यवृत्तिः ।

श्रीनागेशभट्टेन कृतस्य अर्वाचीनसांख्यसूत्रस्य 'लघुसांख्यवृत्तिः' नाम्न्याः टीकाकारः श्रीनागेशभट्टो वर्तते, श्रीविज्ञानभिक्षुणा कृतस्य सांख्यप्रचनभाष्यस्य आधारं गृहीत्वा परमप्रसिद्धेन वैयाकरणश्रीनागेशभट्टेन

कृता 'लघुसांख्यवृत्तिः' नाम्नी संरचना विद्यते । अस्य परमवैयाकरणस्य श्रीनागेशभट्टस्य जन्मकालविषयकं विशेषेण प्राप्यते तद्यथा –

**नाविस्तीर्णं न विस्तीर्णं मध्यानामपि बोधकृत् ।**
**भाष्यप्रदीपव्याख्यानं कुर्वेहं तु यथामति[1] ।।**

पाणिनीयव्याकरणपरम्परायां श्रीनागेशभट्टस्योदयो हि महोदयाय वर्तते । अयमेव श्रीनागेशभट्टो हि वैयाकरणसिद्धान्तकौमुद्या महतीं चानुपमां च बृहच्छब्देन्दुशेखराख्यां व्याख्यामकरोत्[2] । अयं श्रीनागेशभट्टो महाराष्ट्रीयो ब्राह्मणो वर्तते । अस्य श्रीनागेशभट्टस्य पितुर्नाम शिवभट्टस्तथा मातुर्नाम सती देवी वर्तते, अन्यः कोप्यन्वयः श्रीनागेशभट्टस्य नास्ति, इति स्वयमेव लिखति यथा –

शब्देन्दुशेखरः पुत्रो मञ्जुषा चैव कन्यका[3] ।

अस्य श्रीनागेशभट्टस्य गुरुर्हरिदीक्षितः, अस्य श्रीनागेशभट्टस्य गुरुर्हरिदीक्षितो भट्टोजिदीक्षितस्य पौत्रः श्रीभानुजिपुत्रः, अस्य श्रीनागेशभट्टस्य शिष्यो वैद्यनाथो वर्तते । अस्य श्रीनागेशभट्टस्य महती संस्तुतिरस्ति यत् – पञ्चैव महावैयाकरणाः सन्ति, तेषु मुनित्रयं भर्तृहरिर्नागेशश्च । अयं श्रीनागेशभट्टः स्वकीयां पूर्वावस्थायां जडतमः, इति स्वयमेव लघुशब्देन्दुशेखरे लिखति तद्यथा –

**पातञ्जले महाभाष्ये कृतभूरिपरिश्रमः ।**
**शिवभट्टसुतो धीमान् सतीदेव्यास्तु गर्भजः ।।**
**याचकानां कल्पतरोररिकक्षहुताशनाद् ।**
**शृङ्गवेशपुराधीशाद् रामतो लब्धजीविकः[4] ।।**

---

1 व्या. शास्त्रेतिहासः–पृ. सं. १८४

2 व्या. शास्त्रेतिहासः–पृ. सं. १८०

3 व्या. शास्त्रेतिहासः–पृ. सं. १८४

4 लघुशब्देन्दुशेखरमङ्गलाचरणम्

श्रीमता नागेशभट्टेन नैके ग्रन्थाः प्रणीतास्सन्ति तेषां नामान्यनेन प्रकारेण सन्ति यथा[१] -

(१) भाष्यप्रदीपोद्योतः ।

(२) बृहच्छब्देन्दुशेखरः ।

(३) लघुशब्देन्दुशेखरः ।

(४) प्रायश्चित्तेन्दुशेखरः ।

(५) वैयाकरणसिद्धान्तबृहन्मञ्जूषा ।

(६) वैयाकरणसिद्धान्तलघुमञ्जूषा ।

(७) परमलघुमञ्जूषा ।

(८) परमार्थसारविवरणम् ।

(९) काव्यप्रकाशोद्योतः ।

(१०) रसगङ्गाधरमर्मप्रकाशः ।

(११) त्रिंशच्छ्लोकी ।

(१२) सापिण्ड्यनिर्णयः ।

(१३) रसमञ्जरीटीका ।

(१४) वृत्तिसंग्रहः ।

(१५) वेदान्तसूत्रवृत्तिः ।

(१६) सप्तशतीटीका ।

(१७) सांख्यसूत्रवृत्तिः ।

(१८) वाल्मीकिरामायणतिलकाख्या व्याख्या ।

अनेन प्रकारेण श्रीनागेशभट्टस्य समयं जीवनकवनं च यथामति प्रतिपाद्य विषयमिममत्रैव समाप्नोमि ।

---

[1] वै. सि. लघुमञ्जूषा-पृ. सं. २

५.	सांख्यकाष्ठजिह्वः ।

प्रसिद्धाचार्येण श्रीविश्वेश्वरमिश्रेण कृतस्य अर्वाचीनसांख्यसूत्रस्य 'सांख्यकाष्ठजिह्वः' नाम्नी टीका सुविश्रुता प्रसिद्धा च वर्तते, कालानन्तरं देवतीर्थस्वामिनो नाम्ना 'सांख्यकाष्ठजिह्वः' नाम्नी टीका प्रसिद्धिमवापत्[१] ।

३.९	सांख्यदर्शनस्य वर्ण्यविषयः ।

**सांख्यस्य वक्ता कपिलः परमर्षिः पुरातनः ।**
**हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः[२] ।।**

सांख्यदर्शनस्य नैके वर्ण्यविषयाः सन्ति, किन्तु विशेषेणैते विषयाः सन्ति तद्यथा –

३.९.१	सांख्यसिद्धान्ताः ।

३.९.२	त्रिविधं प्रमाणम् ।

३.९.३	कालः ।

३.९.४	पुरुषः ।

३.९.५	मोक्षः ।

३.९.६	जीवनमुक्तिः ।

३.९.७	ईश्वरः ।

३.९.८	सत्कार्यवादः ।

३.९.९	वास्तववादः ।

३.९.१०	सांख्यदर्शनस्य प्रवृत्तिः ।

३.९.११	पुरुषबहुत्वम् ।

३.९.१२	कथमुपरागः ?

३.९.१३	सृष्टिक्रमः ।

३.९.१४	सदसत्ख्यातिः ।

---

1 म. भा. सांख्यम्-पृ. सं. ५५

2 सांख्यसाहित्यविमर्शः-पृ. सं. २०१

एतेषां चतुर्दशानां सांख्यदर्शनस्य वर्ण्यविषयाणां संक्षेपेण चर्चा क्रियते तद्यथा –

३.९.१ सांख्यसिद्धान्ताः ।

सांख्यनये सृष्टिनिर्वहणार्थं भोगापवर्गार्थं च पञ्चविंशतितत्त्वानि निर्दिष्टानि सन्ति । तेषां यथामति प्रतिपाद्य निर्दिष्टानां पञ्चविंशतितत्त्वानिां वर्गीकरणं चतुर्विधमस्ति तद्यथा –

१. प्रकृतिः ।

२. विकृतिः ।

३. प्रकृति–विकृतिः ।

४. न प्रकृतिर्न विकृतिः पुरुषः ।

कश्चिदर्थः प्रकृतिरेव, कश्चिच्च विकृतिरेव, कश्चिच्च पुनः प्रकृतिविकृतिः, कश्चिदनुभयरूपः । तत्र प्रकृतिः प्रधानम् , सत्त्वरजस्तमसां साम्यावस्था, सा ह्यव्किृतिः – न कस्यापि विकारः प्रकृतिरेव स्वयं सतो महदादिविकृतीनां जननी । विश्वप्रपञ्चस्य सा हि मूलरूपा, न तन्मूलान्तरम् अनवस्थाप्रसङ्गात् । प्रकृतिविकृतयः सप्त – महत्तत्त्वम् , अहंकारः, पञ्चतन्मात्राः । पञ्च महाभूतानि, एकादशेन्द्रियाणि च षोडशको विकारः । प्रकृतिविकृतिभिन्नश्च पुरुषः । सोयं पञ्चविंशतिगणः । पुरुषशब्दोत्रात्मानं परमात्मानं चैतद् द्वयमप्यभिधत्ते तद्यथा –

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः**[1] **।।**

सांख्यनय एते सांख्यसिद्धान्ताः प्रतिपादिता वर्तन्ते, सम्प्रति त्रिविधं प्रमाणं प्रस्तूयते तद्यथा –

---

[1] सांख्यकारिका–३

३.९.२ त्रिविधं प्रमाणम् ।

प्रमीयतेनेन तदिति प्रमाणम् , तत्र सांख्याचार्य्यैः त्रीणि प्रमाणानि स्वीक्रियन्ते तद्यथा –

१. दृष्टप्रमाणम् ।

२. अनुमानप्रमाणम् ।

३. आप्तवचनम् ।

एतेषु त्रिषु प्रमाणेष्वेव प्रमाणान्तराणामन्तर्भावो भवति, एतानि त्रीणि प्रमाणानि च लोकप्रमाणाभिप्रायाणि लोकव्युत्पादनार्थत्वाद्धि शास्त्रस्य सन्ति । आर्षं तु विज्ञानं लोकव्युत्पत्तये नालमिति तत्त्वज्ञैः संगृहीतं नास्ति ।

३.९.३ कालः ।

कलति नाम गच्छतीति कालो यद्यपि कापिलैर्न स्वीकृतः, तथापि तत्त्वान्तरत्वेन कालं स्वीकृतवतामप्येकस्याखण्डस्य कालस्यातीतानागतादीनां जनकत्वासम्भवादुपाधिभेदेनैव स उपपादनीयः संभवति । अनेन प्रकारेण सांख्यनयेपि व्यवहारस्याप्रत्याख्यानात्तज्जनकत्वस्य क्लृप्तोपाधीनामेव उररीकरणान्निर्वाह इति न कोपि बाधो भवति ।

३.९.४ पुरुषः ।

पुरि नाम शरीरे वसतीति पुरुषः, न च सांख्याचार्याणां पुरुषबहुत्वं तदसङ्गत्वं चाभिप्रेतम् । असङ्गोयं पुरुषः साक्षिमात्रो द्रष्टव्यः कथं सृष्टिप्रपञ्चे निपतति ? प्रकृतिश्चाचेतना सती पुरुषस्य भोगापवादार्थं कथं प्रवर्तते ? अवाप्तसकलेश्वरस्य भगवतो जगदीश्वरस्यापि जगतः सिसृक्षायां किमभिलक्षितं भवेदिति सृष्टिवृत्तिरेव तावन्नोपपद्यते, इति वाच्यम् । पुरुषोपि व्यासङ्गाद् जपाकुसुमव्यासङ्गात्तद्रागरञ्जितस्फटिकमणिवद्रञ्जितः सृष्टिनिबन्धे निपतति प्रकृतिश्च पुनरचेतनापि पुरुषार्थं प्रवर्तते, यथा – वत्सविवृद्ध्यर्थमचेतनमपि क्षीरं प्रवर्तमानं दुष्टचरम् । तथैव

पारार्थ्यमात्रचेतनायाः प्रकृतेः प्रयोजकत्वमुपपद्यते, सांख्यकारिकाकारः कथयति यथा –

**वत्सादिबुद्धिनिमित्तं क्षीरस्य वा प्रवृत्तिरज्ञस्य ।**

**पुरुषमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य**[1] **।।**

३.९.५ मोक्षः ।

मोक्षयति त्रिविधं दुःखमिति मोक्षः, मुच्लृ – मोक्षणे[2], इति धातोः सन्नन्ताद् णिजन्ताच्च अच्प्रत्यये सति मोक्षशब्दो निष्पद्यते, अथवा मुष्णाति त्रिविधं दुःखमिति मोक्षः, मुष – स्तेये[3], इति धातोः 'सृवृभृशुषिमुषिभ्यः कक्[4]' इत्युणादिसूत्रेण कक्प्रत्यये सति मोक्षशब्दो निष्पद्यते, तत्राधिभौतिकाध्यात्मिकाधिदैविकसकलदुःखान्वितो जीवः कर्मोपासनाया ब्रह्मैक्यज्ञानेनाभ्युदयनिःश्रेयःसिद्धिहेतुको वर्तते, एवं सति प्रपञ्चोच्छेदकस्य त्रिविधदुःखात्यन्तनिवृत्तिलक्षणस्य का गतिर्भवितुमर्हति ? यथा – काचिन्नर्तकी परिषद्भ्यो नृत्यं दर्शयित्वा निवृत्तापि पुनः तद्द्रष्टृकौतुहलादेव प्रवर्तते, तथैव प्रकृतिरपि निवृत्ता सती प्रवर्त्स्यते, इति का खलु वराकस्य मोक्षस्य गतिरिति भावस्य शंका न कर्तव्या, कुतः ? दृष्टान्तवैषम्येन नहि नर्तकीवत्प्रकृतिप्रवृत्तिर्भवति, यथा – हि असूर्यम्पश्या राजदाराः प्रमादाद्धि गलितशिरोञ्चलाश्चेदालोकिताः परपुरुषेण, तदामी तेन कारणेन प्रयतन्ते, यथा – एतान्सप्रमादानपि पुरुषान्तराणि न पश्येयुरिति । अनेन प्रकोरण प्रकृतिरपि विवेकेन दृष्टापि न पुनः कश्चिदेनां पश्येद्यिति, सांख्यकारिकाकारः कथयति यथा –

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।

---

1 सांख्यकारिका-३

2 चुरादिधातुः

3 क्र्यादिधातुः

4 उणादिसूत्रम् ३।४१

या दृष्टास्मति पुनर्न दर्शनमुपैति पुरुषस्य[१] ।।

तदित्थं सांख्यदर्शनस्य समासतो दिङ्मात्रमिदं विवरणमस्ति । महामुनिकपिलादीनामाचार्य्याणां प्रदीप्तप्रतिभायाः प्रभादर्शकं सांख्यदर्शनशास्त्रमिदं तेषां महामुनिकपिलादीनामाचार्य्याणां प्रज्ञाप्रकर्षस्य सडिण्डिमनादं पराकाष्ठाम् उद्घोषयति ।

३.९.६ जीवनमुक्तिः ।

सांख्यदर्शनस्य जीवन्मुक्तिरथवा विदेहमुक्तिरेव परमं प्रयोजनमस्ति । क्लेशकर्मविपाकादिसलिलावसिक्तायां बुद्धिभूमावेव कर्मबीजान्यङ्कुरं प्रसुवते । तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलाया-मुषरायान्तु कुतः कर्मबीजाङ्कुरस्य प्रसवः ? तावत्पुरुषः तथावस्थितः चक्रभ्रमिवद् धृतशरीरो जोषमुक्तः सन् संसारचक्रे सततं परिभ्रमति । शरीरस्योच्छेदे सति स विवेकेन मुक्तो भवति, इयमेव जीवनस्य वास्तविकी मुक्तिर्नाम सांख्यानामस्ति ।

३.९.७ ईश्वरः ।

ईशितुं शीलमस्येतीश्वरः, ईश – ऐश्वर्ये[२], इति धातोः 'स्थेशभासपिसकसो वरच्[३]' इति पाणिनीयसूत्रेण वरच्प्रत्यये सति ईश्वरशब्दो निष्पद्यते । केचन विद्वांसः सांख्यदर्शनमनीश्वरादिदर्शनमनेन प्रकारेणाकलयन्ति तद्यथा –

ईश्वरासिद्धेः[४] ।

प्रमाणाभावान्न तत्सिद्धिः[५] ।

सम्बन्धाभावान्नानुमानम्[६] ।

---

1 सांख्यकारिका

2 अदादिधातुः

3 पाणिनीयसूत्रम् ३।२।१७५

4 सांख्यकारिका – १।९२

5 सांख्यकारिका – ५।१०

6 सांख्यकारिका – १।९६

अनेकेन प्रमाणेन वा तर्केण ईश्वरः कदापि न सिद्ध्यति । नापि परिपूर्णकामस्य सर्वशक्तिमतो भगवतः परमेश्वरस्य जगतो रचनायां किमपि प्रयोजनम् अवश्यमवगतं भवति, इत्यतोपि न जगतः कर्तृत्वं परमेश्वरस्य संगच्छते । चेतनस्याप्यखिलाः प्रवृत्तयः स्वार्थमूलः सन्ति । न च परिपूर्णकामस्य सर्वशक्तिमतो भगवतः परमेश्वरस्य कश्चिदपि स्वार्थो दृश्यते । न च परिपूर्णकामस्य सर्वशक्तिमतो भगवतः परमेश्वरस्य निःसंगस्य पारार्थ्यं कारुण्यं च तस्य निरीहस्य जगत्प्रवृत्तेः प्रयोजनत्वेन स्वीकरणीयमिति तर्क्यम् , तस्य परमकारुण्यादिदोषप्रसङ्गावतारात् । जगत्प्रवृत्त्यर्थमीश्वरस्य सत्तास्वीकरणवचनं तु नितरामपार्थमिति सांख्यानाम् आचार्य्याणामीश्वरास्तित्वमस्त्येवाभिमतम् ।

श्रीमान् भाष्यकारो विज्ञानभिरप्यत्रातिमात्रमुपक्रमते । सः सांख्यदर्शनस्य सेश्वरवादित्वमेवोपपादयति । तन्मते कर्तृत्वशक्तिसम्पन्नस्य सान्निध्यादेव जगत उत्पत्तिं सम्भवति, नान्यथा, सांख्यकारिकाकारः कथयति यथा –

तत्सन्निधानादधिष्ठातृत्वं मणिवत्[१] ।।

३.९.८ सत्कार्यवादः ।

सांख्यदर्शनस्य सत्कार्यवादः प्रसिद्धः सिद्धान्तो वर्तते । कार्यनियतपूर्ववर्तित्वं कारणत्वम् , यथा – बीजम् । तद्भावभावि तदभावाभावि च कार्यम् , यथा – अङ्कुरम् । न तु कार्याभावे कारणाभावः । कस्मात्कारणात् ? तर्हि सांख्यदर्शनानुयायिनः कथयन्ति यद् – व्यापकं हि कारणं व्याप्यं च कार्यम् । न च व्यापकाभावाद् व्याप्याभावो युज्यते, तस्मात्कारणसत्त्वे कार्यसत्त्वम् , अनेन प्रकारेण कारणाभावे कार्याभाव इति ध्रुवो नियमो वर्तते । सत्कार्यवादिनां हि खलु उत्पादात् प्रागपि कार्यस्य कारणेव्यक्तरूपेण विद्यमानत्वस्य स्वीकारात् । उत्पत्त्यनन्तरं तदेव कारणं

---

1 सांख्यकारिका

व्यक्तरूपमुद्‌गृह्णत्कार्यत्वेन परिणमति । तदेवमव्यक्तावस्था हि कारणम् , तद्‌यक्तावस्था च कार्यमित्युपपन्नम् । तयोः कार्यकारणयोरभेदः तात्त्विको भेदस्तु व्यावहारिकः । भेदाभेदव्यवस्थाया किञ्चिन्निबन्धत्वात् सांख्यकारिकाकारः कथयति यथा –

**कार्यरूपेण नानात्वमभेदः कारणात्मना ।**
**हेमात्मना यथाभेदः कुण्डलाद्यात्मना भिदा[१] ।।**

आचार्यवाचस्पतिमिश्रेण प्रणीता सांख्यतत्त्वकौमुदीनाम्नी टीका वर्तते, तत्र स्वयमेव श्रीवाचस्पतिमिश्रो लिखति तद्यथा –

न हि कारणाद् भिन्नं कार्यम् । कारण च सदिति कथं तदभिन्नं कार्यमसद् भवेत् । न पटतन्तुभ्यो भिद्यते तन्तुधर्मत्वात् । इह यद् यतो भिद्यते तत्तस्य धर्मो न भवति यथा – गौरश्वस्य । धर्मस्य पटः तन्तूनाम् , तस्मान्नार्थान्तरम् । ययोरर्थान्तरत्वं न तयोरुपादानयोपादेयभावः । यथा कूर्मः स्वायवयेभ्यः संकोचविकासिभ्यो न भिन्नः, एवं घट-मुकुटावयोपि मुत्सुवर्णादिभ्यो न भिन्नाः ।

स एषः सत्कार्यवादः कापिलानामाचार्य्याणां प्रमुखः सिद्धान्तः । तस्यैतस्य सत्कार्यवादसिद्धान्तस्य परिपोषणार्थम् असदकारणात् , उपादानग्रहणात् , सर्वसम्भवाभावात् , शक्यस्य शक्यकरणादिति युक्तिचतुष्टयं च हेतुत्वेन पुरस्कृतं वर्तते, सैव कारिका विद्यते तद्यथा –

**असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्य्यम्[२] ।।**

अस्यां सांख्यकारिकायां चतस्रो युक्तयः सन्ति, ताः चतस्रो युक्तयोनेन प्रकारेण सन्ति तद्यथा –

१. असदकारणात् ।
२. उपादानग्रहणात् ।

---
[1] सांख्यकारिका
[2] सांख्यकारिका-९

३. सर्वसम्भवाभावात् ।

४. शक्यस्य शक्यकरणात् ।

इममेव सांख्यवादिनां सत्कार्यवादनामकं सिद्धान्तं पुराणेषु गोचरं व्याख्यास्यामि ।

३.९.९ वास्तववादः ।

कापिलादीनामाचार्य्याणां प्रकृतिपुरुषौ स्वतन्त्रसत्ताकौ जगतो मूलकारणभूतौ वर्तेते । सांख्यदर्शनमिदं वास्तववादपरं द्वैतप्रतिपादकमस्ति न वा ? अस्य सांख्यदर्शनस्य नये प्रकृतिपुरुषौ सृष्टिचक्रपरं निर्वाहयतः स्तः । त्रिविधदुःखस्य अत्यन्तनिवृत्तिर्हि मोक्षोत्यन्तपुरुषार्थापरनामको विद्यते । सोढ यमेवात्यन्तपुरुषार्थः प्रकृतिपुरुषान्यख्यातिमन्तरा च संभवितुं नार्हति । विवेकाख्यातिलक्षणादज्ञानादेव बन्धोस्ति । एतदज्ञानमेव त्रिविधदुःखस्य हेतुर्विद्यते । त्रिविधस्य दुखस्य नामान्यनेन प्रकारेण सन्ति तद्यथा -

१. आध्यात्मिकं दुःखम् ।

२. आधिभौतिकं दुःखम् ।

३. आधिदैविकं दुःखम् ।

तत्राध्यात्मिकं शारीरं मानसं च दुःखमस्ति । शरीरमधिकृत्य प्रवृत्तं शारीरं दुःखम् , मनोधिकृत्य प्रवृत्तं मानसं दुःखम् , अतो व्याधिसमुत्थं शारीरम् । कामक्रोधादिसमुत्थं च मानसं दुःखम् । सर्वाणि भूतानि प्राणिनश्च तान् हिंस्रादिजन्तून् अधिकृत्य प्रवृत्तमाधिभौतिकं दुःखम् । देवान् विद्युदादीनधिकृत्य प्रवृत्तमाधिदैविकं दुःखम् ।

३.९.१० सांख्यदर्शनस्य प्रवृत्तिः ।

सर्वाणि शास्त्राणि जीवहितायैव सन्ति । इममेव विषयमादाय पातञ्जलमहाभाष्यकारो भगवान् पतञ्जलिः पाणिनीयव्याकरणं स्मारं स्मारं महाभाष्यस्य पस्पशाह्निके लिखति यद्, यथा लोके वेदे चेति प्रयोक्तव्ये, यथा लौकिकिवैदिकेषु प्रयुञ्जते । यथा लौकिकेषु वैदिकेषु च कृतान्तेषु । लोके तावदभक्ष्यो ग्राम्यकुक्कुटोभक्ष्यो ग्राम्यशूकर इत्युच्यते । भक्ष्यं च नाम क्षुत्प्रतीघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । शकेः कर्मसामान्ये लिङ्गसर्वनामनपुंसकयुक्ते कृत्यप्रत्ययः । ततः पदान्तरसम्बन्धाद् उपजायमानमपि स्त्रीत्वं बहिरङ्गत्वादन्तरङ्गं संस्कारं न बाधत इति शक्यं क्षुदित्युक्तम्, तत्र नियमः क्रियते, इदं भक्ष्यमिदभक्ष्यमिति । तथा - खेदात् स्त्रीषु प्रवृत्तिर्भवति, समानश्च खेदविगमो गम्यायां चागम्यायां च । तत्र नियमः क्रियते, इयं गम्येयमगम्येति ।

वेदे खल्वपि[१] - ''पयोव्रतो ब्राह्मणः, यवागूव्रतो राजन्यः, आमिक्षाव्रतो वैश्यः'' इत्युच्यते । व्रतं च नामाभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते, तथा - ''बैल्वः खादिरो वा यूपः स्यादित्युच्यते । यूपश्च नाम पश्वनुबन्धार्थमुपादीयते । शक्यं चानेन किञ्चिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्द्धुम् । तत्र नियमः क्रियते । लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते । किमिदं धर्मनियम इति ? धर्माय नियमो धर्मनियमः । धर्मार्थो वा नियमो धर्मनियमः । धर्मप्रयोजनो वा नियमो धर्मनियमः । तथाग्नौ कपालान्यधिश्रित्याभिमन्त्रयते - ''भृगूणामङ्गिरसां तपसा तप्यध्वम्'' इति । अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति । तत्र शास्त्रेण नियमः क्रियते - एवं क्रियमाणं कार्य्यमभ्युदयकारि भवतीति ।

---

1 म.भा.पस्पशाह्निकम्

एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते - शब्देनैवार्थोभिधेयो नापशब्देनेत्येवं क्रियमाणमभ्युदयकारि भवति । ''अस्त्यप्रयुक्तः[१]'' इत्यस्मिन् वार्तिके पतञ्जलिः कथयति यद् ''ननु च भवानप्यभ्यन्तरो लोके । अभ्यन्तरोहं लोके न त्वहं लोकः[२] । अतः शास्त्राणि जीवहिताय प्रवृत्तानि सन्ति । तत्रापि दर्शनम् ,किन्नाम दर्शनत्वम् ? दृश्यते विज्ञाप्यते परमार्थतत्त्वमनेनेति दर्शनम् , अत्र दृशिर् प्रेक्षणे[३] इत्यस्माद् धातोः '' करणाधिकरणयोः[४] '' इत्यनेन करणे ल्युटि प्रत्ययेनुबन्धलोपे ''युवोरनाकौ[५] '' इत्यनेन '' यु '' इत्यस्यानादेशे, उपधागुणे च दर्शनशब्दो निष्पन्नो भवति । तथा च सांख्यमेव दर्शनमिति कर्मधारयसमासे सति सर्वं सांख्यं दर्शनमेव भविष्यति । भावसाधनत्वे षष्ठीसमासे सांख्यस्य दर्शनमित्यर्थः । तस्य दर्शनमित्यत्र कर्तरि षष्ठ्या समासे शास्त्रेण यद् यद् दृश्यते विज्ञाप्यते, तत्सर्वमपि दर्शनमेव भवेत् । अधिकरणस्य सम्बन्धत्वेन विवक्षया षष्ठ्यन्तेन समासे तु सांख्यशास्त्रे यत्परात्मनः तत्सम्बिन्धनो वा दर्शनस्य साधकं तदेव दर्शनं स्यात् । एवं सत्युक्तासु व्युत्पत्तिषु यः कोपि सांख्यसम्बन्धी विषयः, सः सर्वोपि दर्शनपदव्यपदेश्यः सिद्ध्यति । अस्यां स्थितौ पञ्चानां वृत्तीनामन्येषां वा प्रकृतिप्रत्ययसन्धिसमासकारकादीनां सर्वेषां दर्शनत्वे न काचिद् बाधाढ पतिष्यति, किञ्च येन केनापि सांख्यज्ञेन दृष्टो व्याकरणे पदार्थो सांख्यदर्शनपदव्यपदेश्यो भवेत् , तथा चेदं शास्त्रं व्याकरणदर्शनं कथयितुं शक्यते । भारतीयदर्शनानामेव स्वभावो यज्जीवेन मानवशरीरमवाप्य परमपुरुषार्थभूते, मोक्षोवश्यं साधनीय इति, इममेव विषयमादाय

---

1 म.भा.पस्पशाह्निकम्

2 म.भा.पस्पशाह्निकम्

3 भ्वादिः १०७१

4 पा.सू. ३।३।११७

5 पा.सू. ३।१।१

पातञ्जलमहाभाष्यकारो भगवान् पतञ्जलिर्महाभाष्यस्य पस्पशाह्निके लिखति यद् –

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।**
**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते[१] ।।**
**उतत्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम् ।**
**उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः[२] ।।**
**सक्तुमिव तितउना पुन्तो यत्र धीरा मनसा वाचमक्रत ।**
**अत्र सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि[३] ।।**
**सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।**
**अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव[४] ।।**

अतः सांख्यानां प्रकृतिर्भोग्या, भोक्ता च पुरुषः । वास्तविकदृष्ट्या अन्तःकरणं भोक्तृ न तु पुरुषः, पुरुषस्यासङ्गत्वात् । अत्रेदमवधेयमस्ति यथा – जपाकुसुमसान्निध्येन स्वच्छोपि स्फटिकमणिः लौहित्यच्छायापत्त्या लोहितः प्रतिभासते, तथैव निःसङ्गोपि पुरुषोढ न्तःकरणप्रतिबिम्बित आत्मानं सुखिनं दुःखिनं चाकलयति । यद्यपि कापिलानामाचार्य्याणां सर्वोपि सुखदुःखादिपरिणामो बुद्धेरन्तःकरणस्य वा न कर्हिचित्पुरुषस्य तस्य कूटस्थनित्यत्वेन तदसम्भवात् तथापि दुःखादिमन्तःकरणवशात्पुरुषस्यात्मनस्तत्र प्रतिबिम्बतया सुखदुःखादिछायापत्त्या विवेकग्रहाभाववशात्सूर्यबिम्बे सलिलोत्थकम्पादिवदौपाधिकम् । पुरुषे सर्वमेतदतात्त्विकमपि सुखदुःखादिकं प्रतिभासत एव । तस्याविवेकमूलकतया विवेकप्रत्यय एव तदुच्छेदोपायः तत्प्रदर्शनार्थमेवास्य दर्शनस्योपक्रमो वर्तते ।

---

1 वाक्यपदीयम् १।१३०

2 ऋ.सं. १०।७१।४

3 ऋ.सं. १०।७१।२

4 ऋ. सं. ८।६९।१२

अतो विगलिततद्भ्रमः पुरुषः पुनः त्रिविधदुःखातीततया अत्यन्तपुरुषार्थस्वरूपं निःश्रेयसं साधयति । तस्यैतस्य विभ्रमविलासस्य निरार्थमेव शास्त्रस्य प्रवृत्तिरस्ति । प्रकृतिपुरुषान्यख्यात्यैव विभ्रमनिरासो भवति । तस्य विभ्रमस्य निरासादेव त्रिविधस्य दुःखस्यात्यन्तनिवृत्तिः । अत्यन्तनिवृत्तिश्चेयं सांख्यानामाचार्याणां नाभाववचना । सत्कार्यवादित्वेनाभावस्य साख्याचार्य्यैरनङ्गीकारः कृतो वर्तते । ध्वंसप्रागभावरूपत्वे कापिलैराचार्य्यैरनागतातीतावस्थयोरेव स्वीकारात् । तदेवं दुःखात्यन्तनिवृत्तित्वं हि तेषां दुःखानागतावस्थया सह वृत्तित्वमेवेति विचारो वर्तते ।

तत्रातीतं दुःखमतीतमव, वर्तमानं च भोगारूढतया स्वयमेवात्येष्यति । अवशिष्टमनागतम् । तदनागतदुःखनिवृत्त्यर्थमेव चास्य कपिलाचार्य्येण प्रवृत्तस्य सांख्यदर्शनस्य प्रवृत्तिरस्ति । सत्कार्यवादः खलु मौलिको राद्धान्तः कापिलानाम् आचार्य्याणाम् । तेषामेव नये सदेव व्यक्तीभवत्कार्यत्वेन परिणमति, न कर्हिचिदसतः सदुत्पद्यते, तदनन्तरं सतो वासत् , इति हेतोरेव तेषां कारणकार्ययोरभेदः, उपादानोपादेययोर्वा तादात्म्यः सम्बन्धः । सत्कार्यवादे सत एव कारणभूताद् दुग्धादुत्पादेन दध्यादिपरिणामो जायते । जगतः सदुत्पत्तिं कापिला आचार्या नाभिनन्दन्ति , यथा - शून्यवादिनोसतः सदुत्पत्तिमभिन्यन्ते, तेषां मते बीजमृत्पिण्डध्वंसानन्तरम् अङ्कुरघटाद्युत्पत्तिदर्शनाद् असतः सदा सर्वथा सर्वदा चाभावादेव भावोत्पत्तिर्जायते । अन्ये च वेदान्तिन एकस्य सतो विवर्त्तकार्यजातं सद्वस्तु, तेषां नये उपादानोपादेययोः तादात्म्यं न वास्तवं किन्तु कल्पितमस्ति , कार्यस्य जगतः रज्जौ सर्पस्येव कल्पितत्वात् । सद्रूपस्य ब्रह्मणोज्ञानेन परिकल्पितं दृश्यमिदं न खलु नाप्यससत् , नापि च सदसद्विरोधात् किन्तु मिथ्याढ कल्पितमेव, सतो ब्रह्मणः तदवस्थाविशेषरूपेणैव तद्विवर्त्तत्वादिति, यथा - कारणकार्ययोर्भेदमङ्गीकुर्वाणा नैयायिका रूपादिविशिष्टात्परमाणोः सकाशादुत्पत्तेः प्रागविद्यमानं द्वयणुकादिलक्षणं रूपादिसमन्वितं कार्यरूपं

जगदुत्पद्यते इत्यभ्युपयन्ति । न तथा सत्कार्यवादिनः कापिलाः तु सत एव सज्जायते, न जात्वसतः सदित्येव राद्धान्तत्वेन समुन्नयन्ति । सत्कार्यवादे तु पुनः सतः कारणादेव कार्यस्यासतोभिव्यक्तिः संजायते नोत्पत्तिः । सतश्चैवाढभिव्यक्तिरुपपद्यते नासतः । यथोत्पीडनेन तैलं तिलेषु , मन्थनेन च सर्पिर्दध्नि, इत्येव सत्कार्यवादस्य निष्कृष्टोर्थः, तद्यथा सांख्यकारिकाकारः कथयति यथा-

**असत्त्वे नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः ।**
**असम्बन्धसमुत्पत्तिमिच्छतो न व्यवस्थितिः**[१] **।।**

३.९.११ पुरुषबहुत्वम् ।

पुरि नाम शरीरे वसतीति पुरुषः, न च सांख्याचार्याणां पुरुषबहुत्वं तदसङ्गत्वं चाभिप्रेतम् । असङ्गोयं पुरुषः साक्षिमात्रो द्रष्टव्यः कथं सृष्टिप्रपञ्चे निपतति ? अनेन प्रकारेणासङ्गोयं पुरुष इत्युक्तम् । सोयं पुरुषोढव्यक्तात् प्रधानात् व्यतिरिक्तः । यद्यपि अहम्प्रत्ययविषयतया पुरुषः सिद्ध एव, न पृथक्तत्साधनम् आवश्यकम् , तथापि तस्य देहादिव्यतिरिक्तसाधनस्यावश्यकत्वात् किञ्चिदिव प्रस्तूयते यद् - सांख्यानां दृश्याः खलु बुद्ध्यादयो हि भोग्याः । न च भोक्तारम् अन्तरेण भोग्यानां भोग्यतोपपद्यते । भोक्ता च भोग्यबुद्ध्यादिव्यतिरिक्त आत्मा, भोक्तृभावात् । भोग्याश्च सुखदुःखदात्मका बुद्ध्यादयः पृथिव्यादिवदिति अनुमितिगम्यम् । भोग्येन किल भोक्तुरनुमेयतया आत्मनोस्तित्वं सूपपन्नं भवति, तद्यथा सांख्यकारिकाकारः कथयति यथा -

**संघातात्परार्थत्वात्त्रिगुणादिविपर्य्ययादधिष्ठानात् ।**
**पुरुषोस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च**[२] **।।**

स च पुरुष आत्मा वा चेतनोनेकश्च वर्तते, तद्यथा सांख्यकारिकाकारः सूत्रयति यथा -

---

1 सांख्यकारिका

2 सांख्यकारिका

पुरुषबहुत्वं व्यवस्थातः[१] ।।

अतः त्रैविध्यस्य पुरुषबहुत्वस्य विषये स्वयमेव सांख्यकारिकाकारो लिखति यथा –

जननमरणकारणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।

पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्च[२] ।।

अनेन प्रकारेण कपिलाद्यिराचार्य्यैः कथितं पुरुषबहुत्वं प्रतिपाद्य विषयमिममत्रैव समाप्नोमि ।

३.९.१२ कथमुपरागः ?

सम्प्रति कापिलाः सांख्यज्ञाचार्य्याः कथयति यद् – असङ्गस्यापि पुरुषस्य पद्मपत्रमिवाम्भसा कथमुपरागो भवितुमर्हति ? तदा स्वयमेव सांख्यकारिकाकारो लिखति यथा –

**निस्सङ्गोपि उपरागोविवेकात्**[३] ।।

क्लेशकर्मादिविविधवासनावासितबुद्धिसत्त्वसंसर्गस्य विरहेपि पुरुषे अविवेकहेतोरुपरागो जायते तद्यथा – कुसुमस्फटिकयोः संसर्गात् स्फटिके जपाकुसुमोपरागः, न तथा बुद्धिसत्त्वपुरुषयोः किन्तु बुद्धिसत्त्वस्य तादाम्यादात्मनः तद्वासनाभिमानः । असङ्गस्यापि पुरुषस्य कथमुपरागत्वम् , तदा सांख्यकारिकाकारः सूत्रयति यथा –

जपास्फटिकयोरिव नोपरागः, किन्त्यभिमानः[४] ।।

अनेन प्रकारेण कपिलादिभिराचार्य्यैः कथितं पुरुषबहुत्वं प्रतिपाद्य विषयमिममत्रैव समाप्नोमि ।

---

[1] सांख्यकारिका ६.४५

[2] सांख्यकारिका १८

[3] सांख्यकारिका २६.६

[4] सांख्यकारिका २६.७

३.९.१३ सृष्टिक्रमः ।

सृज्यतेनया सेति सृष्टिः, सृष्टेः क्रमः, इति सृष्टिक्रमः, तस्य सांख्यनये पञ्चविंशतितत्त्वानि सृष्ट्युत्पक्तिसाधनत्वेनाभिमतानि सन्ति । तत्र प्रकृतिः कर्त्री, पुरुषस्तु जले पद्मपलाशवदसङ्गः । पुरुषः चेतनः, प्रकृतिस्त्वचेतना । सा च सत्त्वरजस्तमसां साम्यावस्था । ततो महान् - महत्तत्त्वं बुद्धितत्त्वमिति । तत्परिणामो अहंकारतत्त्वम् । अहंकारतत्त्वस्य परिणामः पञ्चतन्मात्राणि, एकादशेन्द्रियाणि च । तन्मात्राणां परिणामाः पञ्च महाभूतानि । पञ्चविंशश्च पुरुषः । तत्र पूर्वे चतुविंशतितत्त्वान्यचेतनानि पुरुषश्च चेतनः ।

प्रकृष्टा कृतिरिति प्रकृतिः, अथवा प्रकरोति या सा प्रकृतिः प्रधानपरपर्य्याया । सा हि किलास्य दृश्यस्य जगतः कार्यसंघातस्य मूलभूता वर्तते । न त्वस्या मूलान्तरमनवस्थाप्रसङ्गात् । तदनयोः प्रधानपुरुषयोः संयोगैरेतद् दृश्यं जगदुत्पद्यते । न च सत्त्वरजस्तमसां विरोधशीलानां गुणानां मिथः सुन्दोपसुन्दन्यायेन ध्वंसापत्तेः कथं तेभ्यः कार्य्यस्योत्पादः ? मिथो विरुद्धानामपि वर्त्तितैलानलानां सम्भूय प्रकाशलक्षणकार्योत्पादसम्भवात् ।

**नतेर्देहः कफादस्ति न पित्तादपि मारुताद् ।**
**शोणितादपि वा नित्यः देह एतैस्तु धार्यते ।।**

सुश्रुतवाक्येस्मिन् शोणितस्य न मुख्यं दोषत्वं प्रस्थापितं, किन्तु देहधारणक्रियायां यथा दोषेषु त्रयाणां सर्वेषां मुख्यत्वं, तथैव सप्तधातुष्वपि रक्तस्य विशिष्टं स्थानम् । एतेषां त्रयाणां दोषाणां शरीरे कीदृक् स्थानं वा किं कुर्वन्ति त्रयो दोषाः ? तदा विशेषरूपेण सुस्पष्टं कथयति यद् -

**वायुः पित्तं कफश्चैति त्रयो दोषाः समासतः ।**
**विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च ।।**

एतेषां त्रयाणां शब्दानां निष्पत्तिरनेन प्रकारेण भवति तद्यथा -

वातीति वायुः । कृवापाजिमिस्वदिसाध्य उण्[१] ।

केन जलेन फलति कफः । अन्येभ्योपि दृश्यते[२] ।

श्लेष्मा । सर्वधातुभ्यो मनिन्[३] ।

पित्तशब्दोयं तप सन्तापे[४] तप ऐश्वर्ये[५] तप दाहे[६] इत्थं त्र्यर्थात् तप धातोः कर्तरि क्तप्रत्यये 'पृषोदरादीनि यथोपदिष्टम्[७] ' इत्यत्र पृषोदरादयश्शब्दाः शिष्टैर्यथा प्रदर्शिताः, तथैव निपातनक्रियाबलात्ते साधनीयाः, इत्यर्थानुसारेण वर्णविपर्यये च जाते 'पित्तम् ' इतिशब्दस्य निष्पत्तिर्भवति, अथवा अपिदीयते स्मेति विग्रहे दो अवखण्डने[८] देङ् पालने[९] इतिधातोः क्तप्रत्यये 'अच उपसर्गात्तः[१०] ' इति धातोरचः स्थाने तादेशे

**वष्टि भागुरिल्लोपमवाप्योरुपसर्गयोः ।**

**आपं चैव हलन्तानां यथा वाचा निशा दिशा[११] ।।**

इति कारिकया उपसर्गस्याल्लोपे, संज्ञापूर्वकत्वात् 'दस्ति[१२]' इति दीर्घो न, एवमपि पित्तशब्दो निष्पद्यते । सन्तापदाहैश्वर्यक्रियाणां यः शरीरे कर्ता तत्पित्तमिति । अग्नितोनन्यत्वात् तदग्निशब्देनापि व्यवह्रियते, येन

---

[1] उ. सू. १

[2] पा. सू. ३।२।१०१

[3] उ. सू. ५८४

[4] भ्वादिधातुः १०५४

[5] दिवादिधातुः १२३४

[6] चुरादिधातुः १९५७

[7] पा. सू. ६।३।१०९

[8] दिवादिधातुः १२२३

[9] भ्वादिधातुः १०३१

[10] पा. सू. ७।४।४७

[11] पा. सू. २।४।८२

[12] पा. सू. ३।३।१२४

सन्तापस्योष्णता शरीरे जायते, येन च दाहः दहनक्रिया, भुक्तद्रव्याणां लिप्तद्रव्याणाञ्च पाकरूपा सारमलभागरूपा च जायते, ऐश्वर्यं च निग्रहानुग्रहयोः सामर्थ्यं विशिष्टबुद्धिप्रभावौजस्तेजोरूपं येन जायते, अथवा येन ज्ञानं प्रकाशः, बुद्धेस्तीक्ष्णता, क्रोधः, पराक्रमः, शौर्य्यं, विशिष्टा कान्तिः वर्णश्च एवंविधा विशिष्टा गुणा ऐश्वर्यद्योतका उत्पाद्यन्ते, तदपि पित्तकार्यमेव, यथा अग्नेस्तापप्रकाशौ पाकश्च, तद्वत्पित्तस्यापि समानैव क्रिया इति पित्तस्याग्निसाधर्म्याद् अग्निजातीयत्वम् । अग्निभूतजन्यत्वम् । अग्निभूतजन्यत्वं वा अग्नेर्विकारो वा अग्निर्देवता वा अस्येति आग्नेयत्वम् । यथा वा वातपित्तश्लेष्मणां संघातेन परस्परविरुद्धानां धातूनां शरीरादिकार्यकारित्वसम्भवात् ।

इत्थं मिथो विरुद्धान्यपि सत्त्वरजस्तमांसि जगदुत्पादरूपं कार्यं साधयन्तीति न कश्चिदपि दोषो भवति । अनेन प्रकारेण कपिलादिभिराचार्य्यैः कथितं सृष्टिक्रमं प्रतिपाद्य विषयमिममत्रैव समाप्नोमि ।

३.९.१४ सदसत्ख्यातिः ।

अयं सदसत्ख्यातिवादनामको विषयः कापिलानामाचार्य्याणां नितरां रोचिष्णुरस्ति । अयं सदसत्ख्यातिवादनामको विषयो माध्यमिकानाम् , प्रभाकराणाम् , वेदान्तिनाम् , नैय्यायिकानां वा न रोचते । यदा शुक्तौ रजतप्रतीतिः 'इदं रजतम्' इत्याकारकं ज्ञानं भवति, तदा इदमिति ज्ञानं सत् , रजतमिति ज्ञानं चासत् । तत्र इदमिति सज्ज्ञानं चाक्षुषप्रत्यक्षं विषयीकरोति , अनेन कारणेन सद् रजतमिति ज्ञानं च इन्द्रियगोचरतया उत्तरकाले नेदं रजतमिति बाधितत्वादसत् । यदिदं सदसदिति उभयकोटिमवगाहनं यद् भ्रान्तिज्ञानं तदेव सांख्यानां सदसत्ख्यातिवादपदवाच्यमिति अनिरुद्धः । सांख्यप्रवचनकारः श्रीविज्ञानभिक्षुस्तु पुनः वस्तुमात्रस्य नित्यत्वात् स्वरूपतोढ बाधः, किन्तु चैतन्ये आरोपितत्वात्संसर्गतो बाधो यथा –

स्वरूपेणाबाधः सर्ववस्तूनां नित्यत्वात् , संसर्गतस्तु बाधः सर्ववस्तूनां चैतन्येपीति ।

तथा जगदिदं स्वरूपतः सत् , सदपि चैतन्येध्यस्तं च पुनरसदिति । इत्येवं जातीयकं ज्ञानमेव सदसत्ख्यातिपदेन व्यवहरति ।

सांख्यप्रवर्तको भगवान् कपिलो मुतिरतीव प्राचीनः, इत्यत्र प्रमाणान्तराणि , इयमेव चर्चा महाभारतेपि वर्तते, तत्र महाभारतकारो सांख्यचर्चां करोति तद्यथा -

**संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।**
**तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिताः ।।**
**दोषाणां गुणानां च प्रमाणं लोकविभागतः ।**
**कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपचर्यताम्[१] ।।**

महाभारतस्येव खण्डभूतायां श्रीमद्भगवद्गीतायां पुनः सांख्ययोगयोः बहुशो बहुधा विवेचनं सांख्यदर्शनस्य आध्यात्मिकपक्षे नितरां ख्यातिं च विशदय्य निर्दिशति । सर्वा उपनिषदोपि सांख्यदर्शनस्योत्कीर्तनं कुर्वन्ति, श्वेताश्वतरोपनिषत् कथयति तद्यथा -

तत्कारणं सांख्ययोगादिगम्यम्[२] ।

शांकरभाष्यकारो भगवान् शङ्कराचार्य्योपि सांख्यदर्शनस्योत्कीर्तनं करोति तद्यथा -

शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते[३] ।

श्वेताश्वतरोपनिषदि च सृष्ट्युत्पत्तेः मूलकारणमिति ‘अजा’ सांख्यमेव अनुवदति तद्यथा -

अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः[१] ।

---

[1] महाभारतम्

[2] श्वेताश्वतरोपनिषत् ६.१३

[3] शाङ्करभाष्यम् ६.१३

अस्य सांख्यदर्शनस्य निरुपमस्याविर्भावकत्वं सर्वार्थजातं दिव्यचक्षुषा हस्तामलकत्वात्प्रत्यक्षीकुर्वाणस्य भगवतः कपिलमुनेरेवेति सर्वैः स्वीकृतमस्ति, अनेन कारणेन सुगृहीतनामधेयाः कपिलाचार्याः कस्य वा न स्युर्नमस्याः, अतः सर्वे कथयन्ति तद्यथा –

कपिलाय नमस्तस्मै येनाविद्योदधौ जगति निमग्ने ।
कारुण्यात्साख्यमयी नौरिह विहितावतारणाय[२] ।।

महाभारतस्येव खण्डभूतायां श्रीमद्भगवद्गीतायां पुनः सांख्ययोगस्य द्विसप्ततिः श्लोकाः सन्ति तद्यथा –

**कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।**
**इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन[३] ।।**
**एषा तेभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ।**
**बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि[४] ।।**
**विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।**
**निर्ममो निरहंकारः स शान्तिमधिगच्छति ।।**
**एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।**
**स्थित्वास्यामन्तकालेपि ब्रह्मनिर्वाणमृच्छति[५] ।।**

अनेन प्रकारेण 'सांख्यदर्शनस्य वर्ण्यविषयः' इति विषयं विलिख्य अत्रैव समाप्नोमि ।

---

[1] श्वेताश्वतरोपनिषत् ६.१३

[2] महाभारतम्

[3] श्री. गीता २.४

[4] श्री. गीता २.३९

[5] श्री. गीता २.७१-७२

३.१० सांख्यदर्शनस्य लोकोपयोगिता ।

प्राणिमात्रस्य प्रवृत्तिः सुखं प्रति नितरां भवति । एकक्षणात्मकमपि दुःखं कोपि प्राणी नेच्छति । सांसारिकैर्दुःखैरुद्विग्ना भूत्वा केचन मनुष्या आत्महत्यामपि कर्तुं प्रवर्तन्ते, अनेन प्रकोरण एकक्षणात्मकमपि दुःखं दर्शं दर्शं विद्वांसः सदा सर्वदा सर्वथा च कथयन्ति यथा -

दुःखादुद्विजते लोकः सर्वस्य सुखमीप्सितम् ।

किन्तु किमस्ति सुखम् ? किं सुखस्वरूपम् ? सुखविषयकाणां प्रश्नानां समाधानं कर्तुं जनसमाजोपि क्षमः । केचन कामोपभोगेनेन्द्रियाणां तृप्तिरेव परमं सुखमिति मन्यन्ते, किन्तु तत्त्वज्ञा विद्वांसः कथयन्ति यत् - तत्सुखं दुःखमिश्रितत्वात् त्याज्यमस्ति, एतस्मात्कारणादैहिकसुखोपभोगदुःखं विषमिश्रितमधुतुल्यं सन्त्यज्य ऐकान्तिकस्यात्यन्तिकस्य च गुणस्य गवेषणाय तदुपलब्धये च तत्त्वज्ञाः सर्वे परावारापराश्रीणाः विद्वांसः प्रयत्नशीला भूत्वा दुःखसागरे निमग्नानां साधारणानां जनानामुद्धारणार्थं सततं प्रचारं प्रसारं च कुर्वन्ति, इदमेव दर्शनशास्त्राणां सर्वेषां प्रामुख्यमुद्देश्यमेकमेव वर्तते ।

भारतीयदर्शनेषु द्वादश दर्शनानि प्रसिद्धानि विश्रुतानि च सन्ति, तेषु षड् वैदिकदर्शनानि तथैव षड् अवैदिकदर्शनानि सन्ति । षट्त्सु वैदिकदर्शनेषु सांख्यदर्शनं श्रेष्ठतममस्ति, तस्य प्रवर्तको भगवान् कपिलो वर्तते । तत्र सर्वेषु वेदेषु निहितस्य सांख्यज्ञानस्य सूत्रेषु ग्रथितं कृत्वा शिष्यपरम्पराद्वारा प्रचारः प्रसारश्च कृतो वर्तते । भारतीयसंस्कृतौ सांख्यदर्शनस्य महत्त्वपूर्णं स्थानमस्ति, अतो विद्वांसः सांख्यदर्शनमनेन प्रकारेण प्रशंसन्ति तद्यथा -

नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम् ।
अत्र वः संशयो मा भूज्ज्ञानं सांख्यं परं स्मृतम्[1] ।।

---

[1] महाभारतम्-शान्तिपर्व ३१६.२

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

सतीष्वप्यध्यात्मविद्यासु बह्वीषु स्मृतिषु सांख्ययोगस्मृत्योरेव निराकरणे यत्नः कृतः । सांख्ययोगौ हि परमपुरुषसाधनत्वेन लोके प्रख्यातौ, शिष्टैश्च परिगृहीतौ, लिङ्गेन श्रौतेनोपबृंहितौ[1] ।

तत्कारणं सांख्ययोगाभिपन्नं ज्ञात्वा देवं मुच्यते सर्वपाशैः[2] ।

संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः । अनीशश्चात्मा बध्यतेभोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः[3] ।

**कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक् ।**
**ददाति सर्वभूतानां सर्वभूतहिते रताः[4] ।।**
**जैगीषव्योत्र जनको वृद्धश्चैव पराशरः ।**
**इमं पन्थानमासाद्य मुक्ता ह्यन्ये च मोक्षिणः[5] ।।**

तत्कारणं सांख्ययोगाधिगम्यताम् । ऋषिं प्रसूतं कपिलं यस्तमग्रे[6]।

उपज्ञतां दर्शनराजवीथिषु श्रिता प्रपञ्चे प्रथिता चमत्कृता ।

युक्तिस्मृतिश्रौतसुराज्यमण्डिता सा सांख्यदृष्टिः कपिलप्रकाशिता[7] ।।

**मखेषु हिंसामनलोज्वलां विना**
**शक्ता स्वतन्त्रा प्रकृतिर्महेश्वरम् ।**
**सत्कार्यवादं निजरूपसंस्थितिं**
**मुक्तिं प्रपञ्चाञ्चितमूचिवान् कविः[8] ।।**

---

1 श्वेत. उप. ६.१३

2 ब्र. सू. भा. २.१.३

3 श्वेत. उप. १.८

4 विष्णुपुराणम् ३.२..५४

5 बुद्धचरितम्-१२.६७

6 श्वेत. उप. ५.२

7 सांख्यतत्त्वकौमुदी-प्रस्तावना-पृष्ठसंख्या-८९

8 सांख्यतत्त्वकौमुदी-प्रस्तावना-पृष्ठसंख्या-९०

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

सांख्यं योगो लोकायतं चेत्यान्वीक्षिकी[१] ।।

एतावन्महत्त्वं सांख्यदर्शनस्य वर्तते, अथवा एतावती सांख्यदर्शनस्य लोकोपयोगिता वर्तते, अत एव शास्त्राणां स्थितिः संस्थितिर्नितरामस्ति, सरलभाषया सांख्यदर्शनस्य शास्त्रसम्मता लोकसम्मता च लोक उपयुज्यते यया सेति लोकोपयोगिता प्रस्तूयते तद्यथा -

३.१०.१ सांख्यदर्शनस्याधिकारिस्वरूपम् ।

३.१०.१.१ अस्य सांख्यदर्शनस्य स एवाधिकारी भवितुमर्हति यद् - यो ज्ञानस्य प्रबलः पिपासुर्जिज्ञासुर्भवति ।

३.१०.१.२ जितेन्द्रियायैव सांख्यदर्शनज्ञानस्य वस्तुतोस्योत्तमज्ञानस्योपदेशः प्रदातव्यः ।

३.१०.२ सांख्यदर्शनस्य परब्रह्मपरमात्मस्वरूपम् ।

३.१०.२.१ स एव सर्वेषां भूतानां स्वामी, सम्पूर्णस्य संसारस्य कल्याणकर्ता जगतः कारणादपि कारणवान् वर्तते । प्रकृतिपुरुषाभ्यां परोत्यन्तः सूक्ष्मस्वरूपः समेषां जीवानां सर्वाणि पापानि हरति ।

३.१०.२.२ अनेन प्रकारेण विचारशीलो भूतः सर्वप्रथममस्माज्ज्ञानं सम्प्राप्य प्रकृतिपुरुषाभ्यां श्रेष्ठस्य महापुरुषोत्तमतत्त्वस्य विशेषज्ञानेनैहिकं सुखमवाप्य पारलौकिकमपि सुखमवाप्नोति ।

३.१०.२.३ स एव परमात्मा क्षरस्वरूपोक्षरस्वरूपश्च वर्तते । संसारस्य सर्वेषु प्राणिषु क्षरस्वरूपः परमात्मा विनाशिस्वरूपोस्ति तथा दिव्यसत्यस्वरूपः चेतनात्मैव अक्षरस्वरूपो वर्तते ।

३.१०.२.४ स्वर्गस्थितेषु प्राणिषु कश्चिदेव प्राणी तम्परमात्मानं प्रणमति, तस्य परमात्मनः कृपयाज्ञया च स एव परमात्मोत्तमफलप्रदात्रीं श्रेष्ठां प्रेष्ठां च गतिमपि ददाति ।

---

[1] सांख्यतत्त्वकौमुदी-प्रस्तावना-पृष्ठसंख्या-९१

३.१०.२.५ स्वयं रजोगुणी भगवान् ब्रह्मा तमदगुणिनं रुद्रं कथयति यद् – हे पुत्र ! स एव विराट् पुरुषः सनातनः, अविकारी, अविनाशी, अप्रमेयः, सर्वव्यापी च नैकेषु विशेषणेषु युक्तः कथितः ।

३.१०.२.६ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषो सांख्यदर्शनस्य ज्ञानचक्षुषा दर्शनीयो वर्तते ।

३.१०.२.७ अयमेव सगुणो निर्गुणो वा विश्वात्मा देहधारिणां प्राणिनामन्तरात्मा वर्तते ।

३.१०.२.८ अस्यैव सगुणस्य निर्गुणस्य वा विश्वात्मनः पुरुषस्य सम्पूर्णं विश्वमेव नासिक, मस्तकं, भुजा, पादौ, नेत्रे वर्तन्ते ।

३.१०.२.९ अस्मिन्नेव सगुणे निर्गुणे वा विश्वात्मनि पुरुषे एकत्वं महत्त्वं च विद्यमानमस्ति, अनेन कारणेन अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषः कथितो वर्तते, एकमात्ररूपः स एव सनातनोस्ति, यो विश्वात्मा पुरुषो महापुरुषपदमयमेव धारयति ।

३.१०.२.१० अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषोग्नेरनेकरूपेषु प्रज्वलितो भवति, तथा च स एव सूर्यस्यानेकेषां तापानां मूलमप्यस्ति । सर्वस्य जलस्योत्पत्तेः स्थानसमुद्रोप्यमेव वर्तते ।

३.१०.२.११ अस्मिन्नेव सगुणे निर्गुणे वा विश्वात्मनि पुरुषे यः परमात्मा वर्तते, स एव नित्यो निगुणो मन्यते । स एव वस्तुतो नारायणेन ज्ञातव्योस्ति, अतः सर्वात्मा पुरुषः स एवास्ति ।

३.१०.२.१२ कमलस्य जलस्थितान्यपि पर्णानि सत्सु लिप्तानि न भवन्ति, तथैव अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषः कर्मफलैर्निलिप्तो न भवति, किन्तु कर्मवान् बन्धनवान् मोक्षवानपि जीवात्मनो भिन्नो वर्तते ।

३.१०.२.१३ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषो लोकतन्त्रस्य पूर्णरूपेण प्रकाशकः स एव परमपुरुषो वस्तुतो ज्ञातव्यं परमतत्त्वमस्ति ।

३.१०.२.१४ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषो द्रष्टा द्रष्टव्यः, श्रोता श्रोतव्यः, मन्ता मन्तव्यः, भोक्ता भोक्तव्यः, घ्राता घ्रातव्यः, स्पर्शकः स्पर्श्यश्च नित्योनित्यश्च वर्तते ।

३.१०.२.१५ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषो विधातुः प्रारम्भिकस्य विधानस्योत्पत्तिं करोति । सांख्यदर्शनस्य ज्ञानचक्षुषो विद्वांसो वस्तुतः 'अनिरुद्धः' इति नाम्ना कथितो वर्तते । संसारस्यास्य कयापि कामनया यानि वैदिककर्माणि क्रियन्ते, तानि सर्वाणि वैदिककर्माणि तस्य प्रसन्नतायै भवन्ति ।

३.१०.२.१६ सर्वे देवाः, शान्तस्वभावा मुनयो यज्ञशालायां यज्ञेन अस्यैव सगुणस्य निर्गुणस्य वा विश्वात्मनो यज्ञभागेन यजनं कुर्वन्ति । प्रजानामादीश्वरे ब्रह्मापि तेन परमपुरुषेण समुत्पन्नो भवति ।

३.१०.२.१७ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषो भगवान् वासुदेवः क्षेत्रज्ञस्वरूपे निर्गुणस्वरूपे च ज्ञातव्यः कथितो वर्तते, तस्यैवांशः प्रभावशालिनः संकर्षणरूपात्प्रद्युम्नः प्रादुर्भूतस्तथा च प्रद्युम्नादनिरुद्धः प्रकटितोहंकारस्तथेश्वरो वर्तते ।

३.१०.२.१८ अस्मिन्संसारे ये ये मम भक्ताः सन्ति, ते सर्वे मयि प्रवेशं कृत्वैव विमुक्ता भवन्ति ।

३.१०.२.१९ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषो नारायण एव परब्रह्म वर्तते, अयमेव परमपुरुषः सम्पूर्णस्य विश्वस्य परमतत्त्वमस्ति, स एव परात्परोस्ति, अस्माद्विहाय अन्यं किमपि परात्परं तत्त्वं नास्ति ।

३.१०.२.२० जीवात्मनः श्रेष्ठोव्यक्तोर्थान्मूलप्रकृतिरस्ति, तथा अव्यक्तादव्यक्तः अमृतरूपः परमात्मा वर्तते, किन्तु तस्मादव्यक्तात्परमपरं किमपि नास्ति, अयमेव सगुणो निर्गुणो वा विश्वात्मा देहधारिणां प्राणिनामन्तरात्मा श्रेष्ठतायाः चरमसीमा तथा परमगतिर्वर्तते ।

३.१०.२.२१ तत्पश्चात्क्षयरहितो वृद्धिरहितः पूर्णतयाविनाशी, निर्विकारः, सर्वस्वरूपः परब्रह्मरूप एवावशिष्यते । तस्मादेव भूतस्य भविष्यस्य वर्तमानस्य च सृष्टिकर्तुर्निष्पापस्य ब्रह्मणः सृष्टिं करोति ।

३.१०.२.२२ तस्मादेव सदसत्स्वरूपात्परमात्मन आवयोर्द्वयोः समुत्पत्तिः संजाता । आवां द्वौ तस्यैव पूजनं कुर्वस्तथा तमेव पितृस्वरूपं मन्यावहे ।

३.१०.२.२३ अस्यैव सगुणस्य निर्गुणस्य वा विश्वात्मनः श्रीहरेः सहस्रशिरांसि, सहस्रपादाः, सहस्रमुखानि सन्ति, तानि तस्मादेव देदीप्यमानो भवति ।

३.१०.२.२४ अयमेव सगुणो निर्गुणो वा विश्वात्मा पुरुषः स्त्री नास्ति, पुरुषोपि नास्ति, नपुंसकमपि नास्ति, सदपि नास्ति, असदपि नास्ति, सदसदपि नास्ति । ब्रह्मज्ञानिनः तस्य साक्षात्कारं कुर्वन्ति, कथं यत्तस्य कदापि क्षयो न भवति, अनेन कारणेन सोविनाशी परब्रह्म परमात्मा 'अक्षरः' कथितो वर्तते ।

३.१०.३ सांख्यदर्शनस्या पञ्चविंशतितत्त्वात्मनः स्वरूपम् ।

अतति गच्छति जीवोनेनेत्यात्मा, अयमेव जीवः सर्वेष्वव्यक्तरूपेण शरीरे विराजमानोस्ति । सर्वे महर्षयो यस्य तत्त्वस्यानुसन्धानं कुर्व्वन्ति, यः सम्पूर्णेषु क्षेत्रेषु क्षेत्रज्ञरूपेण स्थितो वर्तते, तमात्मानं वा परमात्मानं सर्वाणि पुराणानि स्तुवन्ति, तत्र श्रीमद्भागवतमहापुराणस्य पञ्चमस्कन्धस्य द्वादशतमेध्याये महात्मा जडभरतो राजानं यहूगणं प्रति श्रवणभक्तिमाध्यमेन कथयति यद् -

**रहूगणैतत्तपसा न याति**
**न चेज्यया निर्वपणाद् गृहाद्वा ।**
**नच्छन्दसा नैव जलाग्निसूर्यै-**
**र्विना महापादरजोभिषेकम्[1] ॥**

[1] श्री. भा. २।१२।१२

हे रहूगण ! महापुरुषाणां चरणरजस्यभिषेकमन्तरेण केवलं तपोयज्ञदानगृहस्थधर्मपालनवेदाध्ययनाध्यनेन तथा जलाग्निसूर्यस्योपासनया तत्परमतत्त्वस्य ज्ञानन्न कदापि प्राप्नोति, अत एव सिद्धमिदम्भवति यत् - सर्वेषां कार्याणां संसिद्धिर्महापुरुषाणां सङ्गेनैव भवितुमर्हति, अतः श्रीमद्भागवतमहापुराणस्यैकादशस्कन्धे भगवान् श्रीकृष्णः स्वयमेवोद्धवम्प्रति कथयति यद् -

**यथोपश्रयमाणस्य भगवन्तं विभावसुम् ।**
**शीतं भयं तमोप्येति साधून् संसुवतस्तथा ।।**
**अन्नं हि प्राणिनां प्राण आर्तानां शरणं त्वहम् ।**
**धर्मो वित्तं नृणां प्रेत्य सन्तोर्वाग् बिभ्यतोरणम्**[१] **।।**

हे उद्धव ! यथा भगवतोग्निदेवस्याश्रयेण शीतस्य भयस्य अन्धकारस्य च नाशो भवति तथैव महात्मनां महापुरुषाणां सेवनेन सम्पूर्णस्य पापरूपिशीतस्य जन्मरूपिभयस्य तथाज्ञानरूप्यन्धकारस्य च नाशो भवति, यथा - प्राणिनां जीवनमन्नमस्ति तथा दुःखिनां पुरुषाणामाश्रयोहमस्मि तथा मृत्योरनन्तरं मनुष्याणां धर्म एव धनमस्ति तथैव जन्ममरणाद् भयभीताय व्याकुलाय च पुरुषाय कृते महापुरुषा एव परमाश्रयाः सन्ति, यथा - श्रीमद्भागवतं कथयति यद् -

न रोधयति मां योगो न सांख्यं धर्म एव च ।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा ।।
व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः ।
यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम्[२] ।।

यथा - सम्पूर्णासक्तीनां नाशसमर्थानां महापुरुषाणां सङ्गो मामवरोद्धुं शक्नोति, अर्थात्प्रेमपाशेन बद्धुं शक्नोति, यथा - योगस्य,

1 श्री. भा. ११।२६।३१-३२

2 श्री. भा. ११।१२।१-२

सांख्यस्य, धर्मपालनस्य, स्वाध्यायस्य, तपसः, त्यागस्य, यज्ञस्य, कूपतडागादिनिर्माणस्य, दानस्य, व्रतस्य, पूजायाः, वेदाध्ययनस्य, तीर्थाटनस्य, यमनियमानां परिपालनादीनि कर्माणि मामवबद्धुन्न शक्नोति, अतो महापुरुषाणां सङ्गो दुर्लभोगम्यस्तथामोघो वर्तते, अतो भगवत्प्राप्तये सत्पुरुषाणां सङ्गोवश्यमेव करणीयः, इममेव विषयं ध्यायं ध्यायं नारदोपि कथयति यद् –

**महत्सङ्गस्तु दुर्लभोगम्योमोघश्च**[1] ।।

**तदेव साध्यताम् , तदेव साध्यताम्**[2] ।।

तामेव सत्सङ्गस्य साधनां कुर्वन्तु, अर्थान्महापुरुषाणां सङ्गः कर्तव्यः, सेवा करणीया तथाज्ञा परिपालनीया । महापुरुषैः प्रतिपादितया श्रवणभक्त्या मनुष्यः परमं पदमवाप्तुं शक्नोति, एतदेव श्रवणभक्तेः फलमस्ति, अतो भगवान् श्रीकृष्णः स्वयमेव श्रीमद्भगवद्गीतायाः त्रयोदशाध्याये कथयति यद् –

**अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।**

**तेपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः**[3] ।।

अपरे ये मन्दमतयः पुरुषाः सन्ति, ते स्वयमेव तत्त्वमजानन्तः तत्त्वज्ञानिभ्यो ज्ञानं श्रुत्वैव तदनुसारमेवोपासनां कुर्वते तथा च ते श्रवणपरायणः पुरुषोपि मृत्यरूपं संसारसागरं निःसन्देहं तरन्ति, श्रीमद्भागवतस्य माहात्म्यं कथयति यद् –

श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः ।

वैकुण्ठस्थो यतः कृष्णः श्रवणाद्यस्य लभ्यते[4] ।।

---

1 ना. सूत्रम् ३९

2 ना. सूत्रम् ४२

3 श्री. गीता १३।२५

4 श्री. भा. मा. ६।७६

हे तपोधनाः ! अहं भगवतो गुणानुवादस्य श्रवणमेव सर्वधर्मेभ्यः श्रेष्ठतमं मन्ये, कथं यद् - भगवतो गुणानुवादश्रवणेन वैकुण्ठस्थितस्य भगवतः प्राप्तिरवश्यमेव भवति । केवलं श्रवणभक्तितो भगवतः प्राप्तिर्भवति, श्रवणभक्तेरुदाहरणानि नैकानि शास्त्रेषु कथितानि सन्ति, यथा - राजा परमभगवदीयो राजा परीक्षिद् भागवतं श्रुत्वैव परमपदमवाप, श्रीमद्भागवतमाहात्म्यं कथयति यद् -

**असारे संसारे विषयविषसङ्गाकुलधियः**
**क्षणार्द्धं क्षेमार्थं पिबत शुकगाथातुलसुधाम् ।**
**किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे**
**परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने[१] ।।**

हे विषयरूपविषस्य संसर्गाद् व्याकुलमतयः पुरुषाः ! कथं कुत्सितकुमार्गाद् व्यर्थं परिभ्रमन्ति ? अस्मिन्नसारे संसारे स्वस्यैव कल्याणार्थं केवलं क्षणमात्रमेव शुकदेवान्निर्गतस्य भागवतकथामृतस्य पानं कुर्वन्तु, केवलं श्रवणादेव मुक्तिः, अस्य कथनस्य साक्षी राजा परीक्षिदेव प्रमाणं वर्तते, तदनन्तरं धुन्धुकारी सदृशः पाप्यपि केवलं भगवतो गुणानुवादश्रवणप्रभावादेव मुक्तो जातः, तथा च शौनकादय ऋषयोपि नित्यं पुराणानां श्रवणेनैव समयं व्यपयन्ति ।

अतो मनुष्यजीवनाय तथा श्रवणान्नास्त्यानन्ददायकः श्रवणीयो विषयः, एवमस्मादेव महापुरुषाणां सङ्गात्सर्वं प्राप्तुं शक्नोति, अतो महापुरुषाणां सङ्गस्य समान आानन्ददायको लाभप्रदश्च संसारे नास्ति द्वितीयः पन्थाः, श्रीमद्भागवतं कथयति यद् -

**तुलयाम लवेनापि न स्वर्गं नापुनर्भवम् ।**
**भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः[२] ।।**

---

[1] श्री. भा. मा. ६।१००

[2] श्री. भा. १।१८।१३

भगवत्सङ्गी नाम नित्यं भगवता सह निवासं कुर्वतामनन्यानां भक्तानां निमेषमात्रमपि सङ्गेन सह वयं स्वर्गस्य मोक्षस्य च समानं न किमपि पश्यामः, पुनः मनुष्याणामिष्टपदार्थानां तु का वार्ता ? अत एव स्वस्य सम्पूर्णं जीवनं महापुरुषाणां सङ्गेन सह भगवतो नाम-रूप-गुण-प्रेम-प्रभाव-लीला-धाम-रहस्य- तत्त्वानाममृतमय्याः कथायाः निरन्तरं श्रवणमेव वरमस्ति तथा च तामेव कथां श्रावं श्रावं प्रेमानन्दे मुग्धो भूत्वा स्वस्यैव समग्रं जीवनं यापनीयं वर्तते । समेषां ज्ञानिनामज्ञानिनां मानवानां कृते परमानन्दप्राप्तये श्रेष्ठतम उपायो वर्तते ।

अयमेवात्मा सूक्ष्मः, अज्ञेयः, अव्यक्तः, अचलः, सर्वेषां प्राणिनामन्तरात्मा वर्तते । यदि सूक्ष्मदृष्ट्या विचारयामो यत् - क्षेत्रमव्यक्तमस्ति, तथैव क्षेत्रज्ञः पञ्चविंशतितम आत्मा वर्तते ।

३.१०.४ सांख्यदर्शनस्य प्रकृतिस्वरूपम् ।

प्रकृष्टा कृतिरिति प्रकृतिः, सम्पूर्णस्य संसारस्य पितामहो ब्रह्मा सर्वप्रथमं शरीरं धृत्वा स्थावरस्य जङ्गमस्वरूपस्य सम्पूर्णत्रिलोकस्य संरचनां चकार, सैव शरीरधारिणां जीवानां प्रकृतिः कथिता वर्तते । सर्वाणि पुराणानि तां मूलप्रकृतिमेव कथयन्ति । प्रकृतिपुरुषावादिनावनन्तौ वर्तेते । आद्यन्तरहितः, द्युतिमान् सम्पूर्णस्य जगतः कर्ता भगवान् श्रीविष्णुरेव त्रिगुणात्मकः प्रधानः कथितो वर्तते ।

इयं प्रकृतिः त्रिगुणात्मिका वर्तते, इयमेव प्रकृतिर्ब्रह्मणः सान्निध्येन सृष्टिकार्यं करोति । सृष्टिप्रलयौ प्रकृतेर्धर्मौ वर्तेते, अनेन कारणेन प्रकृतिरक्षरात्मिका कथिता, तथा चेयं प्रकृतिः महत्तत्त्वादीनां गुणानां सृष्टये पुनः पुनः विकारं लभते, अतः प्रकृतिः क्षरात्मिका कथिता वर्तते, यदा कार्यभूतगुणाः कारणभूतगुणेषु लीना भवन्ति, तस्मिन्समये प्रकृतिरेवावशिष्यते, तदनन्तरमियं प्रकृतिः परमात्मनि लीना भवति, तदा प्रकृतेरस्तित्वं न भवति ।

अष्टौ प्रकृतयः सन्ति, तथा च प्रकृतेः षोडश विकाराः सन्ति, सांख्यशास्त्रिणोष्टानां प्रकृतीनां नामान्यनेन प्रकारेण प्रदत्तानि सन्ति तद्यथा –

१. मूलप्रकृतिः ।

२. महत्तत्त्वम् ।

३. अहङ्कारः ।

४. आकाशम् ।

५. वायुः । ६. अग्निः ।

७. जलम् । ८. पृथिवी ।

विद्वांसः प्रकृतिमिमां लिङ्गरहितामपि कथयन्ति ।

३.१०.५ सांख्यदर्शनस्य बुद्धिस्वरूपम् ।

निश्चयात्मिका बुद्धिः, अथवा बुध्यते ज्ञायते यया सेति बुद्धिः, इयं बुद्धिरात्मभोगं मोक्षं च सम्पादयति, इदमेव बुद्धेः परमं प्रयोजनमस्ति । इयं बुद्धिरात्मन आश्रयं गृहीत्वा नैकान् विषयान् प्रति प्रस्थानं करोति, अनेन कारणेन बुद्धिरात्मानुसारिणी कथिता वर्तते । श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् –

**यथा हि भानोरुदयो नृचक्षुषां तमो निर्हन्यान्न तु सद् विधत्ते ।**
**एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ।।**
**एष स्वयंज्योतिरजोप्रमेयो महानुभूतिः सकलानुभूतिः ।**
**एको द्वितीयो वचसां विरामो येनेषिता वागसवश्चरन्ति[1] ।।**
**संशयोथ विपर्यासो निश्चयः स्मृतिरेव च ।**
**स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्[2] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य बुद्धिस्वरूपस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

[1] श्री. भा. ११।२८।३४-३५

[2] श्री. भा. १।१८।१३

३.१०.६ सांख्यदर्शनस्याहङ्कारस्वरूपम् ।

अनेकगुणैरुत्पन्नस्य संसारस्याद्भुतां विचारयन् भगवान् श्रीहरिः स्वमहत्तत्त्वरूपमहागुणस्य स्मरणमकरोत् , तेनाहङ्कारः समुत्पन्नः, सोहङ्कार एव चतुर्मुखाननो ब्रह्मा वर्तते, यः सर्वेषां लोकानां पितामहस्तथा हिरण्यगर्भः, इति नाम्ना सुप्रसिद्धो वर्तते । एतेषु पञ्चसु भूतेषु षष्ठं तत्त्वं चित्तात्मकमस्ति, सप्तमं तत्त्वं बुद्धिरस्ति तथा तदनन्तरमष्टमं तत्त्वमहङ्करात्मकमस्ति । तेजस आधारो वायुरस्ति, वायोराकाशः, आकाशस्याश्रयोहङ्कारो वर्तते, तथा चाहङ्कारस्याधिष्ठात्री समष्टिः बुद्धिरस्ति, श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् -

**शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।**
**अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः ॥**
**देहेन्द्रियप्राणमनोभिमानो**
**जीवोन्तरात्मा गुणकर्ममूर्तिः ।**
**सूत्रं महानित्युरुधेय गीतः**
**संसार आधावति कालतन्त्रः[1] ॥**
**सहस्रशिरसं साक्षद्यमनन्तं प्रचक्षते ।**
**सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् ॥**
**कर्तृत्वं करणत्वं च कार्यत्वं चेतिलक्षणम् ।**
**शान्तघोरविमूढत्वमिति वा स्यादहंकृतेः ॥**
**वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ।**
**यत्सङ्कल्पविकल्पाभ्यां वर्तते कौमसम्भवः[2] ॥**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्याहङ्कारस्स्वरूपस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. ११।२८।१४-१५

2 श्री. भा. ३।२६।२४-२५

३.१०.७ सांख्यदर्शनस्य मनसः स्वरूपम् ।

एतेषु पञ्चसु भूतेषु षष्ठं तत्त्वं चित्तात्मकमस्ति, तदेव मनो वर्तते, एकादशं तत्त्वमात्मा वर्तते, स एव आत्मा सर्वश्रेष्ठः कथितोस्ति । निश्चयात्मिका बुद्धिरस्ति तथा संशयात्मकं मनोस्ति, अथवा सङ्कल्पविकल्पात्मकं मनः । कर्मणां ज्ञातृत्वेन अनुमानप्रमाणेन क्षेत्रज्ञो जीवात्मा ज्ञातव्यो भवति । सृष्टिकर्ता चतुराननो ब्रह्मा मनःकर्मभ्यां सह सृष्टिमकरोत् । अहङ्कारात्मकात् तत्त्वान्मनसः समुत्पत्तिः संजाता । आदिकाले सृष्टिकर्ता चतुराननो ब्रह्मा भौतिकशरीरस्योत्पत्तितः पूर्वं बुद्धि-अहङ्कार-मनः-चित्तात्मकानामन्येषां पुत्राणामुत्पत्तिमकरोत् । एते चत्वारः पितृणामपि पितरः सन्ति, अर्थात्पञ्चानां महाभूतानामपि जनको वर्तते, श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् -

**नात्मा वपुः पार्थिवमिन्द्रियाणि**
**देवा ह्यसुर्वायुजलं हुताशः ।**
**मनोन्नमात्रं धिषणा च सत्त्व**
**महंकृतिः खं क्षितिरर्थसाम्यम् ।।**
**समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः ।**
**विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैविगतै रवेः किम्[1] ।।**
**क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ।**
**अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ।।**
**मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः ।**
**अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोभवत्[2] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य मनःस्वरूपस्य वर्ण्णनं विशेषेण कृतमस्ति ।

[1] श्री. भा. ११।२८।२४-२५

[2] श्री. भा. ३।२७।६०-६१

३.१०.८ सांख्यदर्शनस्य सूक्ष्मशरीरस्वरूपम् ।

शीर्य्यन्तेङ्गान्यनेन तदिति शरीरम् , हृदयकमले विराजितोढङ्गुष्ठमात्रो जीवात्मा सूक्ष्मशरीरस्य वा लिङ्गशरीरस्य सम्बन्धे जन्ममरणमवाप्नोति । षोडशसु कलासु युक्तं सूक्ष्मशरीरमिदमस्ति, इदं सूक्ष्मशरीरं मम वर्तते, इति बुद्ध्या संसारचक्रे अज्ञानी जीवः स्वयमेव बध्नाति । अयमेव जीवात्मा पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च महाभूतानि, मनो बुद्धिः, एतेषां सप्तदशानां राशिभूतेन सूक्ष्मशरीरेण सह संयोगो भवति । स एव कर्मभेदेन देवादीन् भावान् संप्राप्य अनेकविधो दृश्यते कथितश्च वर्तते । शरीरतत्त्वस्य विज्ञातारो जितेन्द्रिया विद्वांसः स्थूलशरीरात्समुत्पन्नं युक्तं जीवं स्वात्मशक्त्या पश्यन्ति, श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः सन्ति यद्-

**भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ।**
**नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च ।।**
**यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् ।**
**स एव प्रतिबुद्धस्य न वै मोहाय कल्पते[१] ।।**
**शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।**
**अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः ।।**
**देहेन्द्रियप्राणमनोभिमानो जीवोन्तरात्मा गुणकर्ममूर्तिः ।**
**सूत्रं महानित्युरुधेय गीतः संसार आधावति कालतन्त्रः[२] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य सूक्ष्मशरीरस्य वर्ण्णनं विशेषेण कृतमस्ति ।

1 श्री. भा. ३।२७।२४-२५

2 श्री. भा. ११।२८।१४-१५

३.१०.९ सांख्यदर्शनस्य तत्त्वमीमांसा ।

तस्य भावः, इति तत्त्वम् , तत्त्वस्य मीमांसा इति तत्त्वमीमांसा, तां तत्त्वमीमांसां श्रीमद्भागवतस्य प्रथमस्कन्धस्य नवमाध्यायस्यैते सूतभीष्ममुखान्निर्गताः श्लोकाः कथयन्ति यद् -

**तान् समेतान् महाभागानुपलभ्य वसूत्तमः ।**
**पूजयामास धर्मज्ञो देशकालविभागचित् ।।**
**कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम् ।**
**हृदिस्थं पूजयामास माययोपात्तविग्रहम्[१] ।।**
**भक्त्यावेश्य मनो यस्मिन् वाचा यन्नाम कीर्तयन्।**
**त्यजन् कलेवरं योगी मुच्यते कामकर्मभिः ।।**
**स देवदेवो भगवान् प्रतीक्षतां**
**कलेवरं यावदिदं हिनोम्यहम् ।**
**प्रसन्नहासारुणलोचनोल्लस-**
**न्मुखाम्बुजो ध्यानपथश्चतुर्भुजः[२] ।।**
**इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुङ्गवे विभूम्नि।**
**स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ।।**
**तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः ।**
**सायं भेजे दिशं पश्चाद् गविष्ठो गां गतस्तदा[३] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य तत्त्वमीमांसाया वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. १।९।९-१०

2 श्री. भा. १।९।२३-२४

3 श्री. भा. १।९।२३-२४

३.१०.१० सांख्यदर्शनस्य पञ्चमहाभूतस्वरूपम् ।

आकाशादीनि पञ्चमहाभूतानि सन्ति, तेषां विशेषगुणा अनेन प्रकारेण वर्ण्णितास्सन्ति तद्यथा –

१. आकाशस्य गुणः शब्दो वर्तते ।

२. वायोर्गुणः स्पर्शो वर्तते ।

३. अग्नेर्गुणो रूपमस्ति ।

४. जलस्य गुणो रसो वर्तते ।

५. पृथिव्या गुणो गन्धो वर्तते ।

एतेषां शब्दादीनामनेके गुणभेदाः सन्ति, तद्यथा –

१. पृथिव्याः पञ्च गुणाः सन्ति ।

२. वायोर्द्वौ गुणौ वर्तेते ।

३. अग्नेः त्रयो गुणाः सन्ति ।

४. जलस्य चत्वारो गुणा वर्तन्ते ।

५. आकाशस्यैको गुणो वर्तते ।

अनेन प्रकारेण पृथिव्या अन्येषां महाभूतानामपेक्षया अधिका गुणाः सन्ति, अतः पृथिव्या पञ्चसु महाभूतेषु विशेषतमा प्रधानता वर्तते । सांख्यदर्शनस्य तत्त्ववेत्तारः पृथिव्याः शब्दस्पर्शरूपरसगन्धादीन् गुणान् कथयन्ति, तथैव जले चत्वारो गुणाः सन्ति, तत्र गन्धगुणो नास्ति । अग्नेः शब्दस्पर्शरूपादयो गुणाः सन्ति । वायोः शब्दस्पर्शाख्यौ द्वौ गुणौ वर्तेते तथा आकाशस्य शब्दनामक एक एव गुणो वर्तते । अनेन कारणेन पञ्च गुणाः सर्वलोकस्याश्रयभूतपञ्चमहाभूतेषु विद्यमाना वर्तन्ते, एतेषु पञ्चमहाभूतेषु सर्वे प्राणिनः प्रतिष्ठिताः सन्ति, तस्य सांख्यदर्शनस्य पञ्चमहाभूतानां स्वरूपं श्रीमद्भागवतस्यैकादशस्य स्कन्धस्य चतुर्विंशाध्यायस्यैते श्रीभगवतो मुखकमलान्निर्गताः सांख्यदर्शनस्य पञ्चमहाभूतस्वरूपविषयाः नैके श्लोकाः कथयन्ति यद् –

अथ ते सम्प्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितम् ।
यद्विज्ञाय पुमान् सद्यो जह्याद्वैकल्पिकं भ्रमम् ।।
आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगेयुगे[1] ।।
विराण्मयासाद्यमानो लोककल्पविकल्पकः ।
पञ्चत्वाय विशेषाय कल्पते भुवनैः सह ।।
अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते ।
धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते ।।
अप्सु प्रलीयते गन्ध आपश्च स्वगुणे रसे ।
लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते ।।
रूपं वायौ स च स्पर्शे लीयते सोपि चाम्बरे ।
अम्बरं शब्दतन्मात्र इन्द्रियाणि स्वयोनिषु ।।
योनिर्वैकारिके सौम्य लीयते मनसीश्वरे ।
शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ।।
स लीयते महान् स्वेषु गुणेषु गुणवत्तमः ।
तेव्यक्ते संप्रलीयन्ते तत्काले लीयतेव्यये[2] ।।
एष सांख्यविधिः प्रोक्तः संशयग्रन्थिभेदनः ।
प्रतिलोमानुलोमाभ्यां परावरदृशा मया[3] ।।

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य पञ्चमहाभूतस्वरूपस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. ११।२४।१-२

2 श्री. भा. ११।२४।२१-२६

3 श्री. भा. ११।२४।२९

३.१०.११ सांख्यदर्शनस्य गुणत्रयस्वरूपम् ।

सांख्यदर्शनस्य सत्त्वरजःतमःस्वरूपाः त्रयो गुणाः सन्ति, तत्र प्रकाशकः सत्त्वगुणो वर्तते, कर्मप्रवृत्तिकः रजोगुणो वर्तते, मोहात्मकः तमोगुणो वर्तते । अनेन प्रकारेण जीवो गुणस्वरूपो वर्तते, तथैव गुणो जीवस्वरूपस्य प्रतीतिरूपोस्ति । सत्त्वरजःतमःस्वरूपाः त्रयो गुणाः कारणभूतायाः प्रकृतेः समुत्पन्ना वर्तन्ते । एते सत्त्वरजःतमःस्वरूपाः त्रयो गुणाः सर्वेषु प्राणिषु समानरूपेण विद्यमानाः सन्ति, एतेषां सत्त्वरजःतमःस्वरूपाणां त्रयाणां गुणानां ज्ञानं कार्यतो भवितुमर्हति, तस्य सांख्यदर्शनस्य सत्त्वरजःतमःस्वरूपाणां त्रयाणां गुणानां स्वरूपं श्रीमद्भागवतस्यैकादशस्य स्कन्धस्य पञ्चविशाध्यायस्यैते श्रीभगवतो मुखकमलान्निर्गताः सांख्यदर्शनस्य पञ्चमहाभूतस्वरूपविषयाः नैके श्लोकाः कथयन्ति यद् –

**गुणानामसमिश्राणां पुमान् येन यथा भवेत् ।**
**तन्मे पुरुषवर्येदमुपधारय शंसतः[1] ।।**
**सत्त्वस्य रजसश्चैतास्तमसश्चानुपूर्वशः ।**
**वृत्तयो वर्णितप्रायाः सन्निपातमथो श‍ृणु[2] ।।**
**पुरुषं सत्त्वसंयुक्तमनुमीयाच्छमादिभिः ।**
**कामादिभी रजो युक्तं क्रोधाद्यैस्तमसा युतम् ।।**
**यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः ।**
**तं सत्त्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव वा[3] ।।**
**यदेतरौ जयेत्सत्त्वं भास्वरं विशदं शिवम् ।**
**तदा सुखेन युज्येत धर्मज्ञानादिभिः पुमान्[4] ।।**

---

[1] श्री. भा. ११।२५।१

[2] श्री. भा. ११।२५।५

[3] श्री. भा. ११।२५।१३

[4] श्री. भा. ११।२५।११

यदा आशिष आशास्य मां भजेत स्वकर्मभिः ।
तं रजःप्रकृतिं विद्याद्धिंसामाशास्य तामसम्[१] ॥
कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत् ।
प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥
वनं तु सात्त्विको वासो ग्रामो राजस उच्यते ।
तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥
सात्त्विकः कारकोसङ्गी रागान्धो राजसः स्मृतः ।
तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥
सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ।
तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥
पथ्यं पूतमनायस्तमाहार्यं सात्त्विकं स्मृतम् ।
राजसं चेन्द्रियप्रेष्ठं तामसं चार्तिदाशुचि ॥
सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ।
तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम्[२] ॥
निःसङ्गो मां भजेद्विद्वानप्रमत्तो जितेन्द्रियः ।
रजस्तमश्चाभिजयेत्सत्त्वसंसेवया मुनिः ॥
सत्त्वं चाभिजयेद्युक्तो नैरपेक्ष्येण शान्तधीः ।
सम्पद्यते गुणैर्मुक्तो जीवो जीवं विहाय माम्[३] ॥

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य सत्त्वरजःतमःस्वरूपाणां त्रयाणां गुणानां स्वरूपस्य वर्ण्णनं विशेषेण कृतं विद्यते ।

---

1 श्री. भा. ११।२५।१२

2 श्री. भा. ११।२५।९।२३।२९

3 श्री. भा. ११।२५।९।३४।३५

३.१०.१२ सांख्यदर्शनस्य पुरुषबहुत्वस्वरूपम् ।

पुरि नाम शरीरे वसतीति पुरुषः, अयमेव पुरुष एको वर्तते वा अनेकः ? अस्मिन् संसारे कः पुरुषः श्रेष्ठः ? अथवा कः सर्वेषां जीवानां समुत्पत्तेः कारको वर्तते । सांख्यदर्शनस्य मतानुसारमस्मिन् संसारे पुरुषाणां संख्या नैका वर्तते, कथं यत्सांख्यशास्त्रमिदमेकं पुरुषवादं नेच्छति । यो जीवः साधनां कुर्व्वाणो गुणातीतो भवति, स एव गुणातीतो जीवो विश्वरूपे, सनातने, निर्गुणे, परमपुरुषे च प्रविशति, सांख्यदर्शनपुरुषबहुत्वस्वरूपं श्रीमद्भागवतस्यैकादशस्कन्धस्य द्वाविशाध्यायस्योद्धवस्य मुखकमलान्निर्गताः सांख्यदर्शनपुरुषबहुत्वस्वरूपविषयाः श्लोकाः कथयन्ति यद् –

**प्रकृतौ लक्ष्यते ह्यात्मा प्रकृतिश्च तथात्मनि ।**
**एवं मे पुण्डरीकाक्ष महान्तं संशयं हृदि ।**
**छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः ।।**
**त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेत्र शक्तितः ।**
**त्वमेव ह्यात्ममायया गतिं वेत्थ न चापरः[1] ।।**

**नैकात्मतां मे स्पृहयन्ति केचिन्**
**मत्पादसेवाभिरता मदीहाः ।**
**येन्योन्यतो भागवताः प्रसज्य**
**सभाजयन्ते मम पौरुषाणि[2] ।।**

**ततस्तेनानुविद्धेभ्यो युक्तेभ्योण्डमचेतनम् ।**
**उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट्[3] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य पुरुषबहुत्वस्वरूपस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

[1] श्री. भा. ११।२२।२७-२८

[2] श्री. भा. ३।२५।३४

[3] श्री. भा. ११।२२।२७-२८

३.१०.१३ सांख्यदर्शनस्य प्रमाणसंख्यास्वरूपम् ।

प्रमीयतेनेन तदिति प्रमाणम् , विद्वांसः प्रामुख्येन प्रत्यक्षप्रमाणं स्वीकुर्व्वन्ति तथा च सांख्यमतानुसारिणो विद्वांसः शास्त्रप्रमाणमेव विश्वसन्ति । कश्चिदपि साधको ब्रह्मत उपरि भूत्वाकाशस्वरूपं निर्गुणं ब्रह्म प्राप्नोति, तस्मिन्स्थाने प्रत्यक्षानुमानोपमानशब्दाख्यानां चतुर्ण्णां प्रमाणानां तल्लक्षणानां चावश्यकता नास्ति, एतद्विचार्य्य सांख्यदर्शनप्रमाणसंख्यास्वरूपं श्रीमद्भागवतस्यैकादशस्कन्धस्याष्टाविंशाध्यायस्य भूतभावनस्य परमकारुणिकस्य भगवतो मुखकमलान्निर्गताः सांख्यदर्शनस्य प्रमाणसंख्यास्वरूपविषयाः श्लोकाः कथयन्ति यद् –

**एतद्विद्वान् महदुदितं ज्ञानविज्ञाननैपुणम् ।**
**न निन्दति न च स्तौति लोके चरति सूर्यवत् ।।**
**प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ।**
**आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह[1] ।।**
**यदि स्म पश्यत्यसदिन्द्रियार्थं**
**नानानुमानेन विरुद्धमन्यत् ।**
**न मन्यते वस्तुतया मनीषी**
**स्वाप्नं यथोत्थाय तिरोदधानम्[2] ।।**
**यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम् ।**
**व्यर्थेनाप्यर्थवादोयं द्वयं पण्डितमानिनम्[3] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य प्रमाणसंख्यास्वरूपस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. ११।२८।७-८

2 श्री. भा. ११।२८।३२

3 श्री. भा. ११।२८।३७

३.१०.१४ सांख्यदर्शनस्य कर्मफलपुनर्जन्मसिद्धान्तः ।

अज्ञानादिकारणैर्युक्तो जीवः कर्मणां संग्रहं करोति, कर्मभ्यो वासना, वासनातः पुनः कर्माणि भवन्ति , अनेन प्रकारेणानादिरनन्तो महान् सम्यक् सरति गच्छतीति संसारश्चलति । जीवोहङ्कारस्याधीनो भूत्वा तृष्णाकारणेन कर्माणि करोति तथा तानि कर्माणि भावी कार्यकारणयोः संयोगे हेतुर्भवति । येन प्राणिना यानि कर्माणि कृतानि, तैः कर्मभिः तादृशं जन्म लब्ध्वा वासनाप्रभावितो भूत्वा पुनः कर्माणि करोति, यथा संसारेस्मिन् किमपि वस्तु समुत्पन्नं भवति तथा तदेव वस्तु नष्टं भवति, तथैव प्रारब्धस्य पुण्यस्य पापस्य च क्षयेण शरीरमिदं पञ्चतत्त्वं प्राप्नोति तथा संचितपापेन संचितपुण्येन च प्ररितो भूत्वा जीवः समयानुसारं कर्मजनिते द्वितीये शरीरे प्रवेशं करोति, एतद्विचार्य्य सांख्यदर्शनस्य कर्मफलपुनर्जन्मसिद्धान्तं श्रीमद्भागवतस्य एकादशस्कन्धस्यैकत्रिंशाध्यायस्य स्वयं श्रीशुकस्य मुखकमलान्निर्गताः सांख्यदर्शनस्य कर्मफलपुनर्जन्मसिद्धान्तविषयाः श्लोकाः कथयन्ति यद् –

**य एतद् देवदेवस्य विष्णोः कर्माणि जन्म च ।**
**कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते ।।**

इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शन्तमानि
अन्यत्र देहे च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौलभेत[१]

**श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं**
**यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते ।**
**तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं**
**तच्छृण्वन् विपठन्विचारणपरो भक्त्या मिवुच्येन्नरः[२] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य कर्मफलपुनर्जन्मसिद्धान्तस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

[1] श्री. भा. ११।३१।२७-२८

[2] श्री. भा. ११।२८।३२

३.१०.१५ सांख्यदर्शनस्य दैवकालस्वभावादितत्त्वम् ।

गणनीयेषु गुणग्रामेषु बन्धुवन्मनुष्यस्य समुन्नतिसाधकः कर्तव्यमार्गे सहायको गुण उद्योग एव वर्तते । उद्यतस्यैव साहाय्येन परिश्रमं कुर्वन् जनः समाप्नोति सिद्धिम् । प्रायः संसारेस्मिन् द्विविधा जना दृश्यन्ते, प्रथमास्ते ये सर्वं भाग्येनैव भवतीति वदन्तो भाग्यमेव सर्वस्वं मन्यन्ते । तेषामयं सिद्धान्तो यदयं जीवो भाग्यपराधीनः, तदनुसारमेव सिद्धिमसिद्धिं वा लभते । दैवाधीनं जगत्सर्वम् इति मन्यमानाः सन्ति यथा –

दैवं फलति सर्वत्र न च विद्या न च पौरुषम् ।
समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम्[1] ।।

इत्यादीनि वाक्यानि पुरस्कृत्य विविधान्युदाहरणानि च समुपस्थापयन्ति, द्वितीयास्ते ये कर्तव्यमेव श्रेष्ठं मत्वा उद्योगं कुर्वन्ति, तेषां मतानुसारमयं सिद्धान्तो वर्तते, किन्तु केचन कथयन्ति यत् – पूर्वोपात्तकर्माढ तिरिक्तं किमपि भाग्याख्यं वस्तु नास्ति – उक्तं च केनचित् –

पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते ।
तस्मात् पुरुषकारेण विना दैवं न सिद्ध्यति[2] ।।

इत्यादीनि विशिष्टानि शिष्टोपात्तानि वाक्यान्यस्यैव सिद्धान्तस्य श्रेष्ठतामुपदिशन्ति । न केवलं योग्यमेव , अपि तु अयोग्योपि जनो यदर्थमभिलक्ष्य परिश्रमं विदधाति, स निश्चितमेव तदर्थं प्राप्नोतीति कर्मवादप्राधान्यस्य प्रदर्शकः सिद्धान्तः, केनापि कविना साहित्यस्वरणिमनुसरता इत्थं सोदाहरणोपन्यासं वर्णितः –

**उद्यमी लभते सिद्धिमयोग्योपि सुनिश्चितम् ।**
**अनुरुर्गगनस्यान्तं प्रयात्येव दिने दिने[3] ।।**

---

1 सु. र. भाण्डागारम् पृ.सं. ९५

2 सु. र. भाण्डागारम् पृ.सं. ८६

3 सु. र. भाण्डागारम् पृ.सं. ८६

दैवाधीनमेव सर्वं विधेर्विधानं च चक्रवत्स्वयमेव परिवर्तते, न हि काप्यावश्यकता कस्याप्युद्यमस्य । यद्भावि तत्स्वयमेव भविष्यति । न हि तत् किमपि साहाय्यमपेक्षते, इत्यादिनिश्चित्य कर्मपरित्यागपरान् जनान् '' सदैव विधेयं कर्म '' इति प्रेरणाप्रदं समुपदेशं प्रददाति भगवती श्रुतिः -

चरैवेति चरैवेति[१] ।

चराति चरतो भगः[२] ।

नास्त्युद्यमसमो बन्धुः ।

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः[३] ।।

दैवमिति तु कापुरुषाः श्रमरहिता वदन्ति, यत्कर्म यत्नेन न सिद्ध्यति, तत्कर्म तु दैवः कर्तुमक्षमः, अतः केचन कर्मसु पुरुषार्थं कारणत्वेन मन्यन्ते, केचन दैवं प्रशंसन्ति, केचन स्वभावं कारणत्वेन मन्यन्ते । कलति नाम गच्छतीति कालः, अस्मिन् संसारे कालः स्वयमेव सर्वेषां प्राणिनामान्तरिकं पाचयति, किन्तु यः कालमपि पाचयति, तं परमात्मानं कश्चिदपि ज्ञातुं न शक्नोति, अतो भगवतः परमात्मनः प्रेरणया कालः स्वयमेव पञ्चभिस्तत्त्वैः सर्वेषां प्राणिनां सृष्टिमिमां करोति, सर्वे प्राणिनः स्वस्य स्वभावेन जायन्ते म्रियन्ते च, एतद्विचार्य्य सांख्यदर्शनस्य दैवकालस्वभावादितत्त्वं श्रीमद्भागवतस्य तृतीयस्कन्धस्य तृतीयाध्याये स्वयम् उद्धवस्य मुखकमलान्निर्गताः सांख्यदर्शनस्य दैवकालस्वभावादितत्त्वविषयाः श्लोकाः कथयन्ति यद् -

**तस्यैवं रममाणस्य संवत्सरगणान्बहून् ।**

**गृहमेधेषु योगेषु विरागः समजायत ।।**

---

1 श्रुतिवाक्यम्

2 श्रुतिवाक्यम्

3 सु. र. भाण्डागारम् पृ.सं. ८६

**दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् ।**
**को विस्रम्भेत योगेन योगेश्वरमनुव्रतः[१] ।।**
**दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि ।**
**रातो वोनुग्रहार्थाय विष्णुना प्रभविष्णुना[२] ।।**
**दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ।**
**आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम्[३] ।।**
**अन्तः पुरुषरूपेण कालरूपेण यो बहिः ।**
**समन्वेत्येष सत्त्वानां भगवानात्ममायया[४] ।।**
**कालं कर्म स्वभावं च मायेशो मायया स्वया ।**
**आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ।।**
**कालाद् गुणव्यतिकरः परिणामः स्वभावतः ।**
**कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत्[५] ।।**
**कालस्तु हेतुः सुखदुःखयोश्चेत्**
**किमात्मनस्तत्र तदात्मकोसौ ।**
**नाग्नेर्हि तापो न हिमस्य तत्स्यात्**
**क्रुध्येत कस्मै न परस्य द्वन्द्वम्[६] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य दैवकालस्वभावादितत्त्वस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. ३।३।२२-२३

2 श्री. भा. १।१२।१६

3 श्री. भा. ३।२६।२६

4 श्री. भा. ३।२६।२५

5 श्री. भा. १।५।२१-२२

6 श्री. भा. ११।२३।५६

३.१०.१६ सांख्यदर्शनस्य महाप्रलयवर्णनम् ।

लीयन्ते प्राणिनोस्मिन्निति लयः, प्रकृष्टो लयः इति प्रलयः, महांश्चासौ प्रलयः इति महाप्रलयः, सांख्यदर्शनस्य श्रीमद्भागवतस्यैकादशस्कन्धस्यैकत्रिंशत्तमे अध्याये स्वयं श्रीशुकस्य मुखकमलान्निर्गताः सांख्यदर्शनस्य महाप्रलयवर्णनविषयाः श्लोकाः सन्ति यद्

**भगवान् पितामहं वीक्ष्य विभूतीशात्मनो विभुः ।**
**संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत्[1] ।।**
**आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ।**
**त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः[2] ।।**
**राजन् परस्य तनुभृज्जननाप्येहा**
**मायाविडम्बनमवेहि यथा नटस्य ।**
**सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते**
**संहृत्य चात्ममहिमोपस्तः स आस्ते ।।**
**मर्त्येन यो गुरुसुतं यमलोकनीतं**
**त्वां चानघच्छरणदःपरमास्त्रदग्धम् ।**
**जिग्येन्तकान्तकमपीशमसावनीशः**
**किं स्वावने स्वरदयन्मृगयुं सदेहम्[3] ।।**
**सौदामन्या यथाकाशे यान्त्या हित्वाभ्रमण्डलम् ।**
**गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य गतिः:[4] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य महाप्रलयस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. ११।३१।५

2 श्री. भा. ११।२८।६

3 श्री. भा. ११।३१।११-१२

4 श्री. भा. ११।३१।९

३.१०.१७ सांख्यदर्शनस्य जीवन्मुक्तस्वरूपम् ।

जीवितं मरणं जन्तोः[१] इति भागवतवचनानुसारं स्वकीयानां विषयाणाम् अतिक्रमणं न कृत्वा शब्दादिविषयकाणामिन्द्रियाणां यदा स्ववशमात्मा करोति, तदा स्वयमेवात्मा तप आचरति, इत्थम्भूतः स्वमिन्नेव सम्पूर्णलोकेषु व्याप्तस्तथा स्वयमेव सम्पूर्णलोकान् देवतास्वरूपेण पश्यति, सांख्यदर्शनस्य श्रीमद्भागवतस्यैकादशस्कन्धस्य एकत्रिंशत्तमेध्याये स्वयं श्रीशुकस्य मुखकमलान्निर्गताः सांख्यदर्शनस्य जीवन्मुक्तस्वरूपविषयाः श्लोकाः कथयन्ति यद् -

**तस्मान्न ह्यात्मनोन्यस्मादन्यो भावो निरूपितः ।**
**निरूपितेयं त्रिविधा निर्मूला मतिरात्मनि ।**
**इदं गुणमयं विद्धि त्रिविधं मायया कृतम् ।।**
**एतद्विद्वान्मदुदितं ज्ञानविज्ञाननैपुणम् ।**
**न निन्दति न च स्तौति लोके चरति सूर्यवत्[२] ।।**
**य एतां भगवत्प्राप्तिं शृणुयाच्चापि कीर्तयेत् ।**
**तस्य वै भगवत्प्राप्तिर्दुःखहानिश्च जायते[३] ।।**
**इति ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ।**
**श्रीमद्भागवतेनैव भुक्तिमुक्ती करे स्थिते ।।**
**इत्युक्त्वा ते महात्मानः प्रोचुर्भागवतीं कथाम् ।**
**सर्वपापहरां पुण्यां भुक्तिमुक्तिप्रदायिनीम्[४] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य महाप्रलयस्य वर्ण्णनं विशेषेण कृतमस्ति ।

---

1 श्री. भा. १२।६।२५

2 श्री. भा. ११।३१।५

3 श्री. स्कान्दपु. वै. ३।७४

4 श्री. पद्मपु. उ.खण्डः ६।६८-६९

३.१०.१८ सांख्यदर्शनस्य मोक्षस्वरूपम् ।

सव्वा नद्यः समुद्रं सम्प्राप्य स्वस्य नाम स्वरूपं च परित्यजन्ति तथा महत्यो वा लघ्व्यो नद्यः महतीषु नदीषु वा मत्सु नदेषु विलीना भवन्ति, तथैव जीवात्मा परमात्मनि विलीना भवन्ति, अयमेव मोक्षो वर्तते । पापानां पुण्यानां च क्षयो वा तत्प्राप्तानां सुखदुःखदीनां फलानां नाशो भवति, तस्मिन्समये समस्तेषु सांसारिकेषु पदार्थेष्वासक्तिरहितो जीव आकाशसमाननिर्लेपः, निर्गुणे परमात्मनि सिथतो तं परमात्मानं साक्षात्करोति । वेदेषु द्वावात्मानौ कथितौ वर्तेते, तयोरेक आसक्तियुतो जीवात्मा यदाढ सक्तिरहितो भूत्वा विषयेभ्यः पूर्णतया निर्वृत्तो भवति, तदा स मुक्तः कथितः, सांख्यदर्शनस्य मत इदमेव मोक्षस्य लक्षणमस्ति, सांख्यदर्शनस्य पन्थानमनुसृत्य सर्वेषां पुराणानां सांख्यदर्शनस्य मोक्षस्वरूपविषयाः श्लोकाः सांख्यदर्शनस्य मोक्षस्वरूपं कथयन्ति तद्यथा –

**अस्मात्स्वर्गापवर्गौ च मानुष्यनारकावपि ।**
**तिरक्त्वमथवाप्यन्यन्नरः प्राप्नोति वै द्विज[1] ।।**
**दिवं यास्यन्तु मे पूर्वे गङ्गातोयाप्लुतास्थिकाः ।**
**तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता[2] ।।**
**दिवं यास्यन्तु मे पूर्वे गङ्गातोयाप्लुतास्थिकाः ।**
**तत्र त्रिपथगा देवी प्रथमं तु प्रतिष्ठिता[3] ।।**

श्रीस्कन्दपुराणस्य सप्तत्रिंशत्तमाध्याये सरस्वतीं कथां कुर्वाणः श्रीलोमहर्षणो लिखति यद् –

**पवनस्य ह्रदे स्नात्वा दृष्ट्वा देवं महेश्वरम् ।**
**विमुक्तः सर्वकलुषैः शैवं प्राप्नुयात्[1] ।।**

---

[1] श्रीमार्कण्डेयपुराणम् ५२।२३

[2] श्रीमत्स्यपुराणम् १२१।२७

[3] श्रीमत्स्यपुराणम् १२१।२७

पुराणमुनिर्लोमहर्षणं सरस्वतीनदीविषये पृच्छां करोति तदा लोमहर्षणः कथयति यद् – हे मुने ! यत्र सरस्वती वसति तत्र सर्वेषां यज्ञानां पुण्यं फलं मानवः प्राप्नोति, तद्वचनं श्रुत्वेति श्रुत्वा स्वाध्यायपारायणाः सर्वे मुनय एकीभूय सरस्वतीं प्रास्मरन् , तां प्रार्थनां श्रुत्वा साक्षात्सरस्वती तेषां महात्मनां यज्ञे जलप्रवहनार्थमागता, तस्मिन्नैमिषारण्ये सा सरस्वत्यागता, अतस्तस्या नाम काञ्चनाक्षिर्जातम् । ततो मङ्कणकनामर्षिः तां पवित्रजलयुतां सरस्वतीं कुरुक्षेत्रं नीतवान् , तदनन्तरं गयमहाराजस्य यज्ञे तां सरस्वतीनदीरूपेण गयमहाराजो नीतवान् , तत्रोत्तमव्रतधारिणो महर्षयो 'विशाला' इति नामकरणं कृतवन्तः, पुनः महात्मा मङ्कणक ऋषिराहूतवान् , तत्र सरस्वती महानदीरूपेण जाता । उत्तरकौशलस्य विषये देवैः ऋषिभिश्च सेविते पुण्यभागे मुनिरुदालकः सरस्वत्या ध्यानं कृतवान् , अतः तस्य मुनेः कारणेन तं देशमगात् , तत्र वल्कलधारिणः सर्वे मुनयः तस्याः पूजनं चक्रुः । केदारे सा सरस्वती 'मनोहरा' इति नाम्ना विख्याता । तत्र ऋषिभिर्महर्षिभिश्च सेविता सा सरस्वती पापनाशिनी वर्तते , त एव मुनयः परमेश्वरं ध्यात्वा ऋषीणामुपकाराय कुरुक्षेत्रं प्रविष्टा । दक्षप्रजापतिना गङ्गाद्वारे यज्ञः कृतः, तदा विमलां जलयुतां सरस्वतीं प्रकटिता । राजा कुरुः कुरुक्षेत्रे यज्ञं कृतवान् तदा मङ्कणको मुनिः सरस्वतीं तत्राहूतवान् , तदनन्तरं बुद्धिमान् मार्कण्डेयः तां सरस्वतीं सरोवरे प्रावेशयत् । तत्र महाभागो मङ्कणको मुनिः स्तुतिं कृत्वा सा सरस्वती सप्तसारस्वतक्षेत्र आगत्य वसतिं चकार, यथा लिखितमस्ति यद् –

**अभिष्टूय महाभागः पुण्यतोयां सरस्वतीम् ।**
**यत्र मङ्कणकः सिद्धः सप्तसारस्वते स्थितः[२] ।।**
**यस्य हस्तौ च पादौ च पुनश्चैव सुसंयुतम् ।**
**विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते[१] ।।**

1 श्रीवामनपुराणम् ३७।१

2 श्रीवामनपुराणम् ३७।३८

स एव तीर्थफलस्य फलभाग्भवति । तथा च यः प्रतिग्रहं न गृह्णाति, नियमितं भोजनं करोति तथा वश्यानीन्द्रियाणि भवन्ति, स एव पापरहितः तीर्थयात्री सर्वेषां यज्ञानां फलं प्राप्नोति । येन त्रिरात्रिपर्यन्तमुपवासो न कृतः, तीर्थानां यात्रा न कृता, गोदानं न कृतं स दरिद्रो भवति, यज्ञेन यत्फलं प्राप्यते, तत्फलं तीर्थसेवनेन मिलति, यथा -

तीर्थाभिगमने तत् स्याद् यद् यज्ञेनाप्यते[2] ।

समेषु तीर्थेषु पुष्करतीर्थं श्रेष्ठमस्ति, तत्र त्रिसृषु सन्ध्यासु समये दशसहस्रकोटितीर्थानां निवासो भवति । मुनयो देवाश्च तत्र स्नानविधिमप्राप्नुवन् । पुष्करे देवतानां पितॄणां च पुजको मनुष्योऽश्वमेधयज्ञस्य फलं संप्राप्य ब्रह्मलोकं गच्छति । यः कार्तिक्यां पूर्णिमायां तत्रान्नदानं करोति, स ब्रह्मलोकभाग्भवति । पुष्करे गमनं दुष्करमस्ति, पुष्करे तपस्यायाः सुयोगोपि दुष्करो वर्तते, पुष्करे दानस्यावसरोपि दुष्करोस्ति तथा तत्र निवासस्य सौभाग्यमपि दुष्करमस्ति । तत्र निवासं जपं श्राद्धं च कृत्वा मनुष्यः शतपुरुषाणामुद्धारं करोति ।

तथा च भयभीतो राजा मित्रसहस्तदा वृत्तान्तमिमं श्राव्य मृगयाकार्यं सदा सर्वदा त्यक्तम् । सर्वदा भयभीतो राजा मित्रसिहोढ श्वमेधयज्ञमपि कृतवान् , दुःखितेन राज्ञा सर्वदुःखं वसिष्ठाय कथितवान् , योगदृष्ट्या ध्यानकर्मणः श्रीवसिष्ठस्याज्ञानुसारं केवलं गङ्गाजलेन तं दोषं निर्धूतवान् , अनेन प्रकारेण गङ्गाया माहात्म्यमतीव वर्तते, श्रीनारदपुराणे विशालरूपेण गङ्गाया माहात्म्यं वर्तते, अत्र केवलं कैश्चन श्लोकैर्गङ्गास्तवनं करोमि तावद् -

सर्वमेतदशेषेण भ्रातर्मे वक्तुमर्हसि ।
शृण्वतां वदतां चैव गङ्गाख्यानं शुभावहम्[1] ।।

---

[1] अग्निपुराणम् १०९।१

[2] अग्निपुराणम् १०९।४

**पृथिव्यां यानि तीर्थानि पवित्राणि द्विजोत्तम ।**
**तानि सर्वाणि गङ्गायाः कणस्यापि समीन न ।।**
**तुलसीदलसंमिश्रमपि सर्षपमात्रकम् ।**
**गङ्गाजलं पुनात्येव कुलानामेकविंशतिम् ।।**
**तस्माद्विप्र महाभाग सर्वशास्त्रार्थं कोविद ।**
**गङ्गाजलप्रदानेन पाह्यस्मान्पापकर्मणः[२] ।।**
**षडमासं तत्र गङ्गायां स्नात्वा दृष्ट्वा सदाशिवम् ।**
**ब्राह्मणीदत्तशापात्तु मुक्तो मित्रसहोभवत्[३] ।।**
**तस्मान्महिम्नो विप्रेन्द्र गङ्गायाः शक्यते नहि ।**
**पारं गन्तुं सुराधीशैर्ब्रह्मविष्णुशिवैरपि ।।**
**यन्नामस्मरणादेवमहापातककोटिभिः ।**
**विमुक्तो ब्रह्मसदनं नरो याति न संशयः[४] ।।**

अनेन प्रकारेण श्रीनारदपुराणस्य नवमाध्याये वर्णितस्य गङ्गाया माहात्म्यमनेन श्लोकेन पूर्णङ्करोमि यद् -

**गङ्गा गङ्गेति यन्नाम सकृदप्युच्यते यदा ।**
**तदैव पापनिर्मुक्तो ब्रह्मलोके महीयते[५] ।।**
**यज्जलस्पर्शमात्रेण ब्रह्मदण्डहता अपि ।**
**सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः[६] ।।**
**न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितम् ।**
**अनन्तचरणाम्भोजप्रसूताया भवच्छिदः ।।**

---

[1] श्रीनारदपुराणम् ९।२

[2] श्रीनारदपुराणम् ९।१२५-१२६

[3] श्रीनारदपुराणम् ९।१४२

[4] श्रीनारदपुराणम् ९।१४६-१४७

[5] श्रीनारदपुराणम् ९।१४८

[6] श्री. भा. पुराणम् ९।१२

**संनिवेश्य मनो यस्मिञ्छ्रद्धया मुनयोमलाः ।**
**त्रैगुण्यं दुस्त्यजं हित्वा सद्यो यातास्तदात्मताम्[१] ।।**
**इदं गुह्यतमं क्षेत्रं सदा वाराणसी मम ।**
**सर्वेषामेव भूतानां हेतुर्मोक्षस्य सर्वदा ।।**
**अस्मिन् सिद्धाः सदा देवि ! मदीयं व्रतमास्थिताः ।**
**नानालिङ्गधरा नित्यं मम लोकाभिकाङ्क्षिणः[२] ।।**
**नैमिषेथ कुरुक्षेत्रे गङ्गाद्वारे च पुष्करे ।**
**स्नानात्संसेविताद्वापि न मोक्षः प्राप्यते यतः ।।**
**इह संप्राप्यते येन तत एतद्विशिष्यते ।**
**प्रयागे च भवेन्मोक्ष इह वा मत्परिग्रहात्[३] ।।**

इति वर्णनेन वाराणसीक्षेत्रं महत्क्षेत्रमस्ति । ममैवानुग्रहेण यद्यपि प्रयागे तथा क्षेत्रेस्मिन् मोक्षं प्राणी प्राप्नोति, किन्तु प्रयागात्क्षेत्रमिदं महत्क्षेत्रमस्ति, यः पुरुषो योगाभ्यासेन वाराणसीक्षेत्रे परमां सिद्धिमिच्छति, स एव महातपस्वी वर्तते । अस्य क्षेत्रस्य माहात्म्येन तथा मम भक्तिभावनया योगिनः परमं स्थानं प्राप्नुवन्ति । क्षेत्रेस्मिन् मम ध्यानेन योगाग्निः प्रदीप्यते, तेन योगाग्निना देवता अपि दुर्लभं स्थानं न प्राप्नुवन्ति । अव्यक्तचिह्नयुक्तेन शुद्धान्तःकरणा मुनयो मोक्षं प्राप्नुवन्ति, स देवतानां दानवानां च कृते महादुर्लभो वर्तते । अहं सर्वेभ्यो भक्तेभ्यो भोगैश्वर्यमनुत्तमं प्रयच्छामि । अत्र कुबेरेणापि मम विषये सर्वक्रियार्पितेन गणेशस्य भावः प्राप्तः तथा हे देवि ! अग्रे संवर्त्तनामैको भक्त आसीत् , सः क्षेत्रेस्मिन् ममाराधनेन परमां सिद्धिं प्राप्तवान् । पराशरस्य पुत्रो वेदव्यासो महातपस्वी धर्मकर्ता भूत्वा वेदानां स्थितिमकरोत् , देवर्षिसमेता ब्रह्मविष्णुसूर्याः सर्वे वाराणसीक्षेत्रेस्मिन्नुपासनां

---

[1] श्री. भा. पुराणम् ९।१४-१५

[2] श्रीमत्स्यपुराणम् १८०।४७-४८

[3] श्रीमत्स्यपुराणम् १८०।५५-५६

कृतवन्तः । अलर्को राजापि ममैव कृपया पुरीमिमां संप्राप्य चातुर्वर्ण्याश्रमाकुलां स्फीतां जनसमाकीर्णां मामेव सुचिरं प्रतिपत्स्यते । ततः प्रभृति क्षेत्रेस्मिन् निवासिनो गृहिणः सन्यासिनश्च मयि तत्परा भवन्ति तथा ममैव कृपया परमं दुर्लभं मोक्षमवाप्नुवन्ति तथा महाविषयासक्ताः पुरुषा अस्मिन्नेव क्षेत्रे मरणमधिगच्छन्ति, तथा च ते सर्वे संसारेस्मिन् पुनर्जन्म न प्राप्नुवन्ति । य ममतारहितो धैर्ययुक्तः सत्त्वगुणो जितेन्द्रियः, संन्यासिजनश्च मम भक्तिं कृत्वा परममवश्यं मोक्षस्थानमवाप्नोति । स एव मोक्ष अत्रैव सुलभो वर्तते यथा -

**अतः परतरं नास्ति सिद्धिगुह्यं महेश्वरि ! ।**
**एतद्बुध्यन्ति योगज्ञा य च योगेश्वरा भुवि ।।**
**एतदेव परं स्थानमेतदेव परं शिवम् ।**
**एतदेव परं ब्रह्म एतदेव परं पदम्[1] ।।**
**भगवन् ! भक्तिमव्यग्रां त्वय्यनन्यां विधत्स्व मे ।**
**अन्नदत्वं च ते लोकानां गाणपत्यं तथाक्षयम् ।।**
**अविमुक्तं च ते स्थानं पश्येयं सर्वदा यथा ।**
**एतदिच्छामि देवेश त्वत्तो वरमनुत्तमम्[2] ।।**

अनेन प्रकारेण श्रीमत्स्यपुराणे वाराणसीमाहात्म्यं प्रदाय श्लोकेनानेन वर्णनं समाप्नोति यद् -

एवं स भगवांस्तत्र यक्षं कृत्वा गणेश्वरम् ।
जगाम वामदेवेशः सह तेनामरेश्वरः[3] ।।

श्रीकूर्मपुराणकारे वाराणसीमाहात्म्यमेकत्रिंशदध्यायतः पञ्चत्रिंशदध्यायस्य पर्य्यन्तं कूर्मपुराणकारेण कृतं वाराणसीमाहात्म्यं

---

[1] श्रीमत्स्यपुराणम् १८०।७६-७७

[2] श्रीमत्स्यपुराणम् १८०।९३-९४

[3] श्रीमत्स्यपुराणम् १८०।१००

विस्तारपूर्वकं माहात्म्यस्य वर्ण्णनं वर्तते, विस्तारभयात्केवलं पद्यैर्वाराणसीमाहात्म्यपुष्पैः वाराणसीं सर्वे विद्वासः स्तुवन्ति यथा –

**परं गुह्यतमं क्षेत्रं मम वाराणसी पुरी ।**
**सर्वेषामेव भूतानां संसारार्णवतारिणी[१] ।।**
**उत्तमं सर्वतीर्थानां स्थानानामुत्तमञ्च यत् ।**
**ज्ञानानामुत्तमं ज्ञानमविमुक्तं परं मम[२] ।।**
**देवीदं सर्वगुह्यानां स्थानं प्रियतमं मम ।**
**मद्भक्ता यत्र गच्छन्ति मामेव प्रविशन्ति ते[३] ।।**
**मोक्षं सुदुर्लभं ज्ञात्वा संसारं चातिभीषणम् ।**
**अश्मना चरणौ हत्वा वाराणस्यां वसेन्नरः[४] ।।**
**जन्ममृत्युजरामुक्तं परं याति शिवालयम् ।**
**अपुनर्मरणानां हि सा गतिर्मोक्षकाङ्क्षिणाम्[५] ।।**
**यास्यन्ति परमं मोक्षं वाराणस्यां यथा मृताः ।**
**वाराणस्यां विशेषेण गङ्गा त्रिपथगामिनी[६] ।।**
**वाराणसीं समासाद्य पुनाति कुलत्रयम् ।**
**वाराणस्यां महादेवं ये स्तुवन्त्यर्च्चयन्ति च[७] ।।**

अनेन प्रकारेण कूर्मपुराणस्य चतुस्त्रिंशत्तमाध्याये वाराणसीमाहात्म्यस्य वर्ण्णनमस्ति, सम्प्रति पञ्चत्रिंशत्तमाध्याये श्रीसूतोनेन प्रकारेण वाराणसीमाहात्म्यस्य वर्ण्णनं करोति यथा –

---

1 श्रीकूर्मपुराणम् ३१।२२

2 श्रीकूर्मपुराणम् ३१।२४

3 श्रीकूर्मपुराणम् ३१।२८

4 श्रीकूर्मपुराणम् ३१।३५

5 श्रीकूर्मपुराणम् ३१।४०

6 श्रीकूर्मपुराणम् ३१।४९

7 श्रीकूर्मपुराणम् ३१।५३

**प्रयागं परमं तीर्थं प्रयागादधिकं परम् ।**

**विश्वरूपं तथा तीर्थं कालतीर्थमनुत्तमम्[१] ।।**

**उवाच च महादेवी क्रोधनस्त्वं यतो मुने ।**

**इह क्षेत्रे न वस्तव्यं कृतघ्नोसि यतः सदा[२] ।।**

**एवं व्यासं स्थितं ज्ञात्वा क्षेत्रं सेवन्ति पण्डिताः ।**

**तस्मात्सर्वप्रयत्नेन वाराणस्यां वसेन्नरः[३] ।।**

**श्राद्धे वा दैविके कार्ये रात्रावहनि वा द्विजाः ।**

**नदीनां चैव तीरेषु देवतायतनेषु च ।।**

**ज्ञात्वा समाहितमनाः कामक्रोधविवर्जितः ।**

**जपेदीशं नमस्कृत्य स याति परमां गतिम्[४] ।।**

अग्निपुराणे गयामाहात्यम्यस्य वर्ण्णनं कुर्वन् अग्निदेवः स्वयमेव लिखति यद् -

ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा ।

वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा[५] ।।

श्रीमत्स्यपुराणस्य त्रिनवत्यधिकैकशत (१९३) अध्याये नर्मदामाहात्म्यं वर्ण्णयन् मार्कण्डेयः कथयति यद् -

**ततस्त्वनरकं गच्छेत् स्नानं तत्र समाचरेत् ।**

**स्नानमात्रो नरस्तत्र नरकं च न पश्यति[६] ।।**

शाठ्येन नमति यद्यपि ददासि त्वं भूतिमिच्छतो देव ।

भक्तिर्भवभेदकरी मोक्षाय विनिर्मिता नाथ[१] ।।

---

1 श्रीकूर्मपुराणम् ३५।२

2 श्रीकूर्मपुराणम् ३५।२६

3 श्रीकूर्मपुराणम् ३५।३०

4 श्रीकूर्मपुराणम् ३५।३२-३३

5 अग्निपुराणम् ११५।५

6 श्रीमत्स्यपुराणम् १९१।१

नर्मदा सरितां श्रेष्ठा सर्वपापविनाशिनी ।
मुनिभिः कथिता पूर्वमीश्वरेण स्वयम्भुवा[२] ॥
तत्र स्नात्वा नरो राजन्दैवतैः सह मोदते[३] ॥
अक्षयं मोदते कालं यावच्चन्द्रदिवाकरौ ॥
नर्मदातटमाश्रित्य ये च तिष्ठन्ति मानवाः[४] ॥
शुक्लतीर्थं ततो गच्छेत्सर्वपापविनाशिनम् ।
नास्ति तेन समन्तीर्थं नर्मदायां युधिष्ठिर[५] ॥
सर्वत्र सर्वदिवसे स्नानं तत्र समाचरेत् ।
पितॄणां तर्पणं कृत्वा चाश्वमेधफलं लभेत्[६] ॥
नर्मदायां स्थितं राजन्सर्वपातकनाशनम् ।
तत्र तीर्थे नरः स्नात्वा ब्रह्महत्यां व्यपोहति[७] ॥
यत्तत्र दीयते दानं सर्व कोटिगुणं भवेत्[८] ॥
विधूय सर्वपापानि ब्रह्मलोके महीयते ।
मनोहरं तु तत्रैव तीर्थं परमशोभनम्[९] ॥
नर्मदा सरितां श्रेष्ठा महादेवस्य वल्लभा ।
मनसा संस्मरेद्यस्तु नर्मदां वै युधिष्ठिर[१०] ॥

---

1 श्रीमत्स्यपुराणम् १९१।४२

2 श्रीकूर्मपुराणम् ४१।१

3 श्रीकूर्मपुराणम् ४१।५

4 श्रीकूर्मपुराणम् ४१।२३-२४

5 श्रीकूर्मपुराणम् ४१।६७

6 श्रीकूर्मपुराणम् ४१।१०७

7 श्रीकूर्मपुराणम् ४२।१०

8 श्रीकूर्मपुराणम् ४२।१८

9 श्रीकूर्मपुराणम् ४२।२०

10 श्रीकूर्मपुराणम् ४२।४०

पतन्ति नरके घोर इत्याह परमेश्वरः ।
नर्मदां सेवते नित्यं स्वयं देवो महेश्वरः ।
तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी[१] ।।
इदं त्रैलोक्यविख्यातं तीर्थं नैमिषमुत्तमम् ।
महादेवप्रियतरं महापातकनाशनम् ।।
महादेवं दिदृक्षूणामृषीणां परमेष्ठिना ।
ब्रह्मणा निर्मितं स्थानं तपस्तप्तुं द्विजोत्तमाः[२] ।।
अन्नदानं तपस्तप्तं श्राद्धयागादिकं च यत् ।
एकैकं नाशयेत्पापं सप्तजन्मकृतं यथा[३] ।।
उद्वाहयामास च तं स्वयमेव पिनाकधृक् ।
मरुतां च शुभां कन्यां स्वयमेति च विष्णुताम् ।।
एतज्जप्येश्वरं स्थानं देवदेवस्य शूलिनः ।
यत्र तत्र मृतो मर्त्यो रुद्रलोके महीयते[४] ।।
माहात्म्यमविमुक्तस्य यथावत्समुदीरितम् ।
इदानीं च प्रयागस्य माहात्म्यं ब्रूहि सुव्रत ।।
यानि तीर्थानि तत्रैव विश्रुतानि महान्ति वै ।
इदानीं कथयास्माकं सूत सर्वार्थविद्धवान्[५] ।।
एतत्प्रजापतेः क्षेत्रं त्रिषु लोकेषु विश्रुतम् ।
अत्र स्नात्वा दिवं यान्ति ये मृतास्तेपुनर्भवाः[६] ।।
कथितुं नेह शक्नोमि बहुवर्षशतैरपि ।

---

1 श्रीकूर्मपुराणम् ४२।४२

2 श्रीकूर्मपुराणम् ४३।१-२

3 श्रीकूर्मपुराणम् ४३।१३

4 श्रीकूर्मपुराणम् ४३।४१-४२

5 श्रीकूर्मपुराणम् ३६।१-२

6 श्रीकूर्मपुराणम् ३६।२०

संक्षेपेण प्रवक्ष्यामि प्रयागस्येह कीर्तनम्[1] ।।
प्रयागं विशतः पुंसः पापं नश्यति तत्क्षणात् ।
योजनानां सहस्रेषु गङ्गां स्मरति यो नरः[2] ।।
तस्य यावन्ति लोमानि सन्ति गात्रेषु सत्तम ।
तावद्वर्षसहस्राणि रुद्रलोके महीयते[3] ।।
भक्त्या शृणोति यो मर्त्यो दीपमाहात्म्यमुत्तमम् ।
सर्वपापविनिर्मुक्तः स याति विष्णुमन्दिरम्[4] ।।
यदा सूर्यस्य ग्रहणं कालेन भविता क्वचित् ।
सरस्वत्यां तदा स्नात्वा पूता स्वर्गं गमिष्यसि[5] ।।
स्थाणुतीर्थं ततो गच्छेत्सहस्रलिङ्गशोभितम् ।
तत्र स्थाणुवटं दृष्ट्वा मुक्तो भवति किल्बिषैः[6] ।।
यो नरः कुरुते यात्रां कुरुक्षेत्रस्य पुण्यदाम् ।
न तस्य न्यूनता काचिदिह लोके परत्र च[7] ।।
अहो द्विजवराख्यातं गङ्गाद्वारसमुद्भवम् ।
माहात्म्यमधुना ब्रूहि बदर्या पापनाशनम्[8] ।।

महाफलदायिनः बद्रीनाथस्य सेवनेन मानवः संसारस्य सर्वबन्धनात्प्रमुच्यते, अनेन नैकविधं महिमानं कथयति, तत्र नैकानि तीर्थानि कथयित्वा मोहिनी स्वयमेव बद्रीनाथस्य माहात्म्यस्यान्ते कथयति यथा –

---

1 श्रीकूर्मपुराणम् ३६।२२

2 श्रीकूर्मपुराणम् ३६।२९

3 श्रीकूर्मपुराणम् ३६।४८

4 पद्मपुराणम् ४।३।३५

5 श्रीकूर्मपुराणम् ३४।५०

6 श्रीवामनपुराणम् ४२।३०

7 श्रीनारदपुराणम् ६६।३२

8 श्रीनारदपुराणम् ६७।१

**कल्याणानि सदा तत्र प्रसादात्सन्ति हरेः ।**
**वर्द्धन्ते सम्पदस्सर्वास्तथा विष्णुप्रसादतः[१] ।।**
**मथुरायाश्च माहात्म्यं श्रावयेद्यः शृणोति च ।**
**सोपि भक्तिं हरौ लब्ध्वा सर्वान्कामानवाप्नुयात्[२]।।**
**अनाथं दुर्गतं विप्रं नाथवन्तमथापि वा ।**
**उद्वाहयति यस्तीर्थे तस्य पुण्यफलं शृणु ।।**
**यावत् तद्रोमसंख्या च तत्प्रसूतिकुलेषु च ।**
**तावद्वर्षसहस्राणि शिवलोके महीयते[३] ।।**
**तत्र स्नात्वा तु राजेन्द्र ह्यर्चयेद् वृषभध्वजम् ।**
**अश्वमेधफलं प्राप्य रुद्रलोके महीयते[४] ।।**

अनेन प्रकारेण ‘पुराणेषु सांख्ययोगवेदान्तविमर्शः’ इति मम शोधमहानिबन्धस्य दशसूपप्रकरणेषु तृतीयम्प्रकरणं विविच्य मया शोधविषयः सुचारुतया प्रस्थापितो वर्तते, अतो मम शोधमहानिबन्धस्य विस्तारभयाद् विशेषमुल्लेखमत्र न करोमि ।

1 श्रीनारदपुराणम् ६७।८२

2 श्रीनारदपुराणम् ७।५६

3 श्रीमत्स्यपुराणम् १९२।३७-३८

4 श्रीमत्स्यपुराणम् १८९।१४